# THEATRE STUDIES

COURSE CODE: M23SN01SE
Skill Enhancement Course
Postgraduate Programme in
Sanskrit Language and Literature
Self Learning Material

SREENARAYANAGURU OPEN UNIVERSITY

SREENARAYANAGURU OPEN UNIVERSITY
The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# Theatre Studies

Course Code: M23SN01SE

Semester - III

## Skill Enhancement Course
## Postgraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SGOU

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# THEATRE STUDIES

Course Code: M23SN01SE
Semester- III
Skill Enhancement Course
MA Sanskrit Language and Literature

SREENARAYANAGURU OPEN UNIVERSITY


**Academic Committee**

Dr. Shyla C.A.
Prof. C.S. Sasikumar
Prof. M. S. Muraleedharan Pillai
Dr. K. M. Sangameshan
Dr. J.P. Prajith
Dr. Sreejith T.G.
Dr. N.K. Sundareswaran
Dr. K. Unnikrishnan
Dr. Chandrashekaran Nair



**Development of the Content**

Dr. Lakshmi C.

**Review and Edit**

Dr. G. Sahadevan

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Dr. Jothilekshmi M.
Dr. Sreeja J.
Dr. Vijayarajan K.U.
Anju J.
Chitra Baskar.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

**Director, MDDC :**
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.


Scan this QR Code for reading the SLM on a digital device.


**Edition**
May 2025



**Copyright**
© Sreenarayanaguru Open University



ISBN 978-81-985210-5-7



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.


www.sgou.ac.in

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V.P.

01-05-2025

# CONTENTS


**Block - 1 The History of Performance in India** **1**

Unit - 1 A General Study of Ancient Indian Theatre. 2

Unit - 2 Introduction To Sanskrit Theatre 13

Unit - 3 Bharata's Natyasastra 20

Unit - 4 Abhinavagupta - Sarngadhara - Abhinayadarpana - Hastalaksana Dipika - Balaramabharata - Kerala Theatre 31

**Block - 2 Rituals and Performance Conventions** **46**

Unit - 1 Rituals-Music-Dance 47

Unit - 2 Kathakali-Astapadiyattam-Mohiniyattam- Chakyarkuttu-Kudiyattam 55

Unit - 3 Krisnanattam- Krsnagiti 75

Unit - 4 Eight Episode in Krisnanattam 87

**Model Question Paper (SET – A)** **93**

**Model Question Paper (SET – B)** **96**

# The History of Performance in India

# BLOCK - 1

SGOU

UNIT 1

# A General Study of Ancient Indian Theatre

## प्राचीनभारतीयनाट्यस्य सामान्यमध्ययनम्

## Learning Outcomes

- प्राचीनभारतीयनृत्यपरम्परायाः परिचयं संपादयन्ति।
- विविधानां भारतीयनृत्यशैलीनां लक्षणानि ज्ञास्यन्ति।
- नृत्यकला-सम्बद्धं सांस्कृतिकं ऐतिहासिकं च मूल्यं विश्लेषयिष्यन्ति।
- विभिन्ननृत्यनाट्यशैलीसु दृश्यमानान् रसान् भावान् च ज्ञास्यन्ति।

## Background

संस्कृतसाहित्ये दृश्यकाव्यपदमपि प्रभूतसमृद्धं विद्यते। संस्कृतसाहित्ये सुप्रसिद्धं भवति महाकविना कालिदासविरचितम् अभिज्ञानशाकुन्तलम्। तत्तु संस्कृतनाटकानां विश्वविख्यातिं प्रसार्य रूपकसाहित्यस्य गौरवं प्रदास्यत् विशेषख्यातिं संपादितं च। काव्यापेक्षया अनुवाचकलोके नाटकानां प्रतिष्ठाधिका भवति, यतः अपण्डितोऽपि लोकवर्गः दृश्यभागाभिनयेन आत्मानं विनोदयितुं प्रभवति। अतः एवालङ्कारिकाः 'काव्येषु नाटकम् रम्यम्' इत्युद्घोषयन्ति। काव्यगतरसानुभूतेः कृते कवित्वमयस्य वातावरणस्यावश्यकता भवति इत्यतः सहृदयाः एव काव्यमास्वादयितुं प्रभवन्ति। अभिनये पुनर्वेशभूषाजवनिकादयः रसानुकूलं वातावरणं उपपादयन्ति इत्यतः साधारणजनेभ्योऽपि रसानुभवावसरं ददाति। अत एव नाटकान्तं कवित्वम् इत्यामनन्ति।



SGOU

## Keywords

काव्यं, दृश्यकाव्यम् , नाट्यं, रूपकं, उपरूपकं, रसं, नाटकं, दशरूपकं, भासः, कालिदासः, शूद्रकः, भवभूतिः।

## Discussion

### 1.1.1 साहित्यशास्त्रे काव्यभेदाः

दृश्यकाव्यं, श्रव्यकाव्यं च

साहित्यशास्त्रे काव्यस्य द्वौ भेदौ स्तः - दृश्यकाव्यम् तथा श्रव्यकाव्यम्। दृश्यकाव्यस्य माध्यमेन भावकः कस्यश्चित् घटनाया वा वस्तुनः वा स्पष्टं ज्ञानं प्राप्नोति, किन्तु श्रव्यकाव्यस्य माध्यमेन केवलं श्रवणसुखं लभ्यते। श्रव्यकाव्ये आनन्दानुभूतिः कल्पनामार्गेण लभ्यते, यदा दृश्यकाव्ये स एव आनन्दः रंगमञ्चे साक्षात्कारेण अनुभवति। यद् अभिनयं कर्तुं शक्यते तद् दृश्यकाव्यम् इत्युच्यते - 'दृश्यं तत्राभिनेयम्'। एवं दृश्यकाव्यमेव रूपकम् इत्यपि कथ्यते। 'रूपकं' इत्यस्य निष्पत्तिः 'रूप' धातोः ण्वुल् प्रत्यययोगेन भवति। एते उभौ शब्दौ 'नाट्य' इत्यस्य द्योतकौ स्तः। नाट्यशास्त्रे 'दशरूपकं' इति शब्दः नाट्यविधायाः अर्थे प्रयुक्तोऽस्ति।

भारतीयसंस्कृतेः समृद्धायाः कलासंस्कृतेः च प्रमुखः अंशः अस्ति नाट्यकला। संस्कृतनाट्यं भारते महत्त्वपूर्णं स्थानं धारयति। इदं केवलं मनोरञ्जनाय न, अपि तु धार्मिक-सांस्कृतिक-आध्यात्मिक-मौलिकतत्त्वानां संवाहकं भवति। संस्कृतनाट्यस्य प्रसिद्धाः

नाटककाराः भासः, कालिदासः, शूद्रकः, भवभूतिः प्रभृतयः सन्ति। एतेषां नाटकानि भारतीयसंस्कृतेः गूढतत्त्वानि प्रकटीकुर्वन्ति। संस्कृतनाट्ये 'रस' नामकः भावः मुख्यतया चर्च्यते, यस्मिन् दर्शकाः विविधान् अनुभवान् प्राप्नुवन्ति। एवमेव संस्कृतनाट्यं केवलं प्राचीना कला न, अपि तु अद्यतनकाले अपि सा नूतनं सन्देशं वहति। संस्कृतनाट्यस्य आधारभूतं शास्त्रं नाट्यशास्त्रम् इति प्रसिद्धं, यः ग्रन्थः भरतमुनेः कृतिः अस्ति। अस्मिन् ग्रन्थे नाट्यस्य सिद्धान्तं, अभिनयः, सङ्गीतं, नृत्यं च विस्तरेण वर्णयति।

संस्कृतनाट्यस्य आधारभूतं शास्त्रं नाट्यशास्त्रम्

### 1.1.2 दृश्यकाव्यानामुद्देश्यम्

नाट्यम् इत्येतत् दृश्यकाव्यस्य रूपं विद्यते, यत्र नायकनायिकयोः संवादः, अभिनयः, गीतं, वादनं, नर्तनं च सम्यक् समन्वितानि भवन्ति। नाट्यं श्रव्यं दृश्यं च भवति। एतत् जनानां शिक्षायै, मनोरञ्जनाय च प्रवर्तते। नाट्येन धर्मार्थकाममोक्षप्रदर्शनं शक्यते। तेन लोकव्यवहारस्य अनुकरणं दृश्यते, यथार्थजीवनस्य प्रतिबिम्बं दृश्यते च।

नाट्यं दृश्यं श्रव्यं च भवति

नाटकानामुद्देश्यमपि नितान्तमहत्त्वपूर्णं भवति । लोके यानि वृत्तानि घटन्ते तेषां चित्रणमेव नाटकेऽपि कथ्यते । तस्य विषयोऽप्यसीमतां भजन्ते। लोक-त्रितयगतानां घटनानां प्रदर्शनं रूपकमङ्गीकरोति। नाटकानामुद्देश्यमपि विशालमेव। 'नाटकं विनययुक्तजनानां सुखदं अनुभवं प्रदाय हितं बोधयति; तच्च हितं सुखरूपेण सुगमत्वेन प्रतिष्ठितम्'। नाटकावेक्षणेन केचन अशक्ताः शक्तिं लभन्ते, केचनोत्साहम्, अपरे धैर्यम्, केचन विवेकम् । अत एव 'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्' इति कालिदासेन उपवर्णितम्। न किञ्चिद् एतादृशं वस्तु अस्ति यन्नाटकाभिनेयतां न गच्छेत्। अत एव नाट्यशास्त्रकाराः उक्तवन्तः -

नाटकं विनययुक्तजनानां सुखदं अनुभवं प्रदाय हितं बोधयति; तच्च हितं सुखरूपेण सुगमत्वेन प्रतिष्ठितम्

**'न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**न स योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यन्ते॥'**

वेदाः सर्वविधज्ञानखनयः इत्याख्यायन्ते परन्तु त्रैवर्णिकमात्रलभ्याः, परं नाटकं पुनः सार्वजनिकतया ततो विशिष्यते।

### 1.1.3 दृश्यकाव्यस्य प्राचीनता

वैदिकयुगे दृश्यकाव्यानामस्तित्वं प्रमाणितं भवति

संस्कृतसाहित्ये दृश्यकाव्यानामुदयः प्राचीनकालात् एवाजायत। वैदिकयुगे दृश्यकाव्यानामस्तित्वं प्रमाणितम् भवति। ऋग्वेदीयसूक्तैः प्रतीयते यत् तदा दृश्यकाव्यानामुदयः इति। सोमविक्रयसमये क्रियमाणस्याभिनयस्य वर्णनं तत्काले दृश्यकाव्यस्य सद्भावं सूचयति। संहिताब्राह्मणग्रन्थयोः शैलूषशब्दोपलब्धिरपि वैदिकयुगे दृश्यकाव्यस्यास्तित्वं प्रमाणयति। ऋग्वेदगताः यमयमीसंवादाः सरमापणिसंवादाश्च तदानीं नाटकस्यास्तित्वं प्रतिपादयितुं क्षमाः।

रामायण-महाभारतकालेऽपि दृश्यकाव्यस्योद्भवः भवति

रामायणकालेऽपि दृश्यकाव्यानामस्तित्वस्य स्फुटप्रमाणमिह उपलभ्यते। रामायणे 'शैलूष' - 'नट' 'नर्तक' प्रभृतीनां दृश्यकाव्याङ्गानामुल्लेखो विद्यते। 'साञ्ची' स्थले प्राप्तासु मूर्तिषु कथकानां समूहस्य प्रतिमा अपि लभ्यते, यत्र ताभिः चेष्टाभिः अभिनयः प्रकाश्यते। महाभारताङ्गभूते हरिवंशे रामचरिताभिनयस्योल्लेखो लभ्यते। एभिः प्रमाणैस्तदात्वे दृश्काव्यस्योद्भावः प्रमापितो भवति।

पाणिनिप्रणीतायाम् अष्टाध्याय्यां 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४।३।११०) तथा 'कर्मन्दकृशाश्वादिनिः' (४।३।१११) इति सूत्रद्वयं दृश्यते। अतः अत्र स्पष्टं सिद्ध्यति यत् तस्मिन् समये नटानां शिक्षार्थं सूत्राणि विरच्यन्ते स्म। तेषां च शिक्षा अभिनयस्य प्रबलीकृतप्रचारतां सूचयति।

भगवतः पतञ्जलेः महाभाष्यम् अपि तदीयकाले अभिनयस्य सत्त्वं प्रकाशयति। यत्र हि -

‘ये तावदेते शोभनिका नाम, एते प्रत्यक्षं कंसं घातयन्ति, प्रत्यक्षं च बलिं बन्धयन्ति’ इति उक्तं दृश्यते। अत्र प्रत्यक्षकंसवधः च बलिबन्धः च अभिनय एव स्यात् इति स्पष्टं सिद्ध्यति। अनेन तदा अभिनयप्रचारस्य साक्ष्यमपि लभ्यते।

द्वितीयशतकनिर्मिते वात्स्यायनीये कामसूत्रे अपि अभिनयनाट्ययोः लोकप्रसङ्गः निर्दिश्यते -

वैदिककालादारभ्य विक्रमकालपर्यन्तं अभिनयः भारतदेशे प्रचारे आसीत्

‘पक्षस्य वा मासस्य वा प्रज्ञातेऽहनि सरस्वत्या भवन एवास्य नियुक्तानां नित्यं समाजः। कुशीलवाश्चागन्तवः प्रेक्षकमेषां दद्युः’ इति। अनेन सूच्यते यत् नागरिकजनानां मनोरञ्जनाय अभिनयः प्रमुखं साधनं जातम् इति।

एवं तत्रोपर्युक्तैः प्रमाणैः स्पष्टं सिद्ध्यति यत् वैदिककालादारभ्य विक्रमकालपर्यन्तं अभिनयस्य भारतदेशे प्रचुरः प्रचारः आसीत् इति। विक्रमसमयात्परं कालिदासप्रभृतीनां नाट्यकृतिषु च निरवच्छिन्नं रूपकप्रवाहं द्रष्टुं शक्यते।

### 1.1.4 नाट्यस्य परिभाषा

अद्य प्रश्नः एषः उत्थायते - ‘किम् नाम नाट्यम्?’। दशरूपककारः आचार्यः धनञ्जयः नाट्यस्य परिभाषां एवं ददाति - ‘अवस्थानुकरणं नाट्यम्’, अर्थात् अवस्थायाः अनुकरणं नाट्यम् इत्युच्यते।

रूपकं नाम दृश्यकाव्यरूपं भवति

रूपकम् - एकं सांस्कृतिकं दर्पणम्। रूपकम् इत्येतत् संस्कृतसाहित्ये विशेषं स्थानं प्राप्नोति। एषः शब्दः नाट्यकलायाः प्रतिनिधित्वं करोति। रूपकं नाम दृश्यकाव्यरूपं भवति, यत्र अभिनयः, संवादः, गीतम्, नर्तनम्, च एकत्र संयुज्यते। अस्य मुख्यं लक्ष्यं भवति - श्रोतॄणां वा दर्शकाणां शिक्षणं, तेषां भावनां स्पर्शनं, च मनोरञ्जनस्य साधनं च।

### 1.1.5 रूपकस्य इतिहासः

रूपककला भारतस्य प्राचीनपरंपरायाः एकः अभिन्नभागः। वैदिके काले अपि नाट्यस्य उल्लेखः दृश्यते। भरतमुनिना रचितं नाट्यशास्त्रम् नाट्यकलायाः मूलग्रन्थः। तत्र भरतः दश रूपकाणि निर्दिशति - यथा नाटकम्, प्रहसनम्, डिमम्, व्यायोगः,इत्येवमादयः।

भरतः नाट्यशास्त्रे दशरूपकाणि निर्दिशति

कालिदासः, भवभूतिः, भासः, शूद्रकः च अनेके महाकवयः अद्भुतानि रूपकाणि रचयामासुः। अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, मृच्छकटिकम् इत्यादीनि अमररूपकाणि संस्कृतसाहित्यजगति प्रसिद्धानि सन्ति।

### 1.1.6 रूपकस्य अवयवाः

रूपकं चतुर्विधभिनयैः युक्तं भवति -

रूपकं चतुर्विधाभिनयैः युक्तं भवति

1. आङ्गिकाभिनयः (शारीरिकचेष्टया भावप्रकाशनम्)
2. वाचिकाभिनयः (वाणीद्वारा भावव्यक्तिः)
3. सात्त्विकाभिनयः (अन्तर्बुद्धेः भावः)
4. आहार्याभिनयः (वस्त्राभरणादिना चरित्रोपयुक्तत्वम्)

एते सर्वे सम्यक् मिलित्वा दर्शकेषु रससंप्लवं जनयन्ति।

### 1.1.7 दशरूपकाणि - रूपकप्रकाराणां विस्तृतस्वरूपम्

भारते प्राचीननाटकपरंपरायाम् अभिनयकला अत्यन्तं समृद्धा आसीत्। एषा परंपरा भरतमुनिना रचितेन नाट्यशास्त्रेण सूत्ररूपेण संगृहीता। नाट्यशास्त्रे रूपकशब्देन दृश्यकाव्यं निर्दिष्टम्। भरतमुनिना दश रूपकाणि निर्दिष्टानि, यानि "दशरूपकाणि" इत्युच्यन्ते। एतेषां माध्यमेन नाटकविधायाः विविधानि रूपाणि, तेषां लक्षणानि, विन्यासः, च स्पष्टतया ज्ञायन्ते।

दशरूपकाणि-

1. नाटकम्
2. प्रकरणम्
3. भाणः
4. प्रहसनम्
5. डिमः
6. व्यायोगः
7. समवकारः
8. ईहामृगः
9. वीथी
10. अङ्कः

**प्रत्येकस्य संक्षिप्तविवरणम्**

1. नाटकम् -

दीर्घं भवति, उच्चवर्गीयचरित्रैः युक्तम्, मुख्यतः राज्ञां चरितं दृश्यते। अभिज्ञानशाकुन्तलम् तस्य आदर्शः।

2. प्रकरणम् -

नाटकमिव दीर्घं, किन्तु लौकिकजीवनाधारितम्। पात्राणि साधारणजनाः। मालतीमाधवम् उदाहरणम्।

3. भाणः -

एकेन पात्रेण एव अभिनयः, हास्यप्रधानः, संवादो न अस्ति, प्रायः कल्पनासंवादैः युक्तः। श्रीहर्षस्य नायकमण्डनम् उदाहरणम्।

4. प्रहसनम् -

हास्यरसयुक्तं रूपकम्, सामाजिकदोषाणाम् उपहासरूपेण चित्रणम्। द्वैपायनप्रहसनम् प्रसिद्धम्।

5. डिमः -

भीषणवृत्तान्तप्रधानं, अतिमानुषचरित्रैः युक्तं रूपकम्। युद्धानि, संहाराः च दृश्यन्ते।

6. व्यायोगः -

लघुरूपकम्, एकाङ्कम्, वीररसप्रधानम्, मुख्यतः क्षत्रियपात्रैः युक्तम्।

7. समवकारः -

बहूनि पात्राणि, लोकरक्षणं प्रमुखं विषयः, देवासुरसङ्ग्रामादिकं चित्र्यते।

8. ईहामृगः -

स्वप्नरूपेण अद्भुतघटनायाः चित्रणम्, फलनिश्चयः न दृश्यते।

9. वीथी -

धूर्तपुरुषस्य चरितप्रधानं रूपकम्, हास्यरसयुक्तं।

10. अङ्कः -

एकाङ्करूपेण, एकं खण्डमात्रं दृश्यते, मुख्यतः गम्भीरविषयं निरूपयति।

### 1.1.8 दशरूपकाणां महत्त्वम्

दशरूपकाणां माध्यमेन नाट्यकलायाः विविधरूपाणि सम्यक् अवगन्तुं शक्यते

एते दश रूपकप्रकाराः संस्कृतनाटकसाहित्ये विविधरुचीनां जनानां कृते रसोत्पादनाय रचिताः। केचित् वीररसप्रधानाः, केचित् हास्यरसयुक्ताः, अन्ये करुणरसप्रधानाः। भरतमुनिना एतेषां रूपकाणां रचनानियमाः, संवादविन्यासः, चरित्रविकासः च स्पष्टतया निर्दिष्टाः। दशरूपकाणि संस्कृतसाहित्ये रूपककाव्यानां सुव्यवस्थितं वर्गीकरणं सूचयन्ति। एषां माध्यमेन नाट्यकलायाः विविधरूपाणि सम्यक् अवगन्तुं शक्यते। अस्मिन्सुन्दररूपकशास्त्रे भारतीयं संस्कृतिपरंपरां, धर्मं, नैतिकतां, हास्यं च सम्यक् प्रकारेण दृष्टुं शक्नुमः। तस्मात्,

दशरूपकाणि न केवलं नाट्यकलायाः विभागः, अपि तु भारतस्य सांस्कृतिकविकासस्य अमूल्यभागः इति वक्तुं शक्यते।

## Summarised Overview

साहित्यशास्त्रे काव्यस्य द्वे शाखे स्तः—श्रव्यकाव्यम् एवं दृश्यकाव्यम्। यत्र अभिनयः, संवादः, गीतं, नर्तनं च दृश्यते, तद् दृश्यकाव्यम्, यत् श्रोतॄणां चक्षुषा श्रवणेन च अनुभवगम्यं भवति। दृश्यं काव्यं "रूपकम्" इत्यपि कथ्यते, सः 'रूप' धातोः निष्पन्नः। भारतीयसंस्कृतौ नाट्यकला धर्म-संस्कृति-शिक्षा-मनोरञ्जनस्य साधनरूपेण विकसितवती। नाटकं केवलं विनोदयुक्तं न, अपि तु लोकानां हिताय च। एतस्य माध्यमेन धर्मार्थकाममोक्षाः, जीवनस्य यथार्थप्रतिबिम्बं च प्रदर्श्यते।

दृश्यकाव्यस्य प्राचीनता वैदिकयुगात् आरभ्य दृश्यते। ऋग्वेदे, रामायणे, महाभारते, पाणिनिना, पतञ्जलिना च अभिनयस्य प्रमाणानि सूचितानि सन्ति। नाट्यशास्त्रे भरतमुनिना दश रूपकाणि निर्दिष्टानि, यथा- नाटकम्, प्रकरणम्, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, ईहामृगः, वीथी, अङ्कः। रूपके पञ्चाभिनयाः (आङ्गिक, वाचिक, सात्त्विक, आहार्य, संकीर्ण) रसोत्पत्तिं कुर्युः। एवं दशरूपकाणि नाट्यकलायाः समृद्धां परम्परां सूचयन्ति, यैः संस्कृतनाट्यं न केवलं कालातीतं कला, अपि तु भारतीयसंस्कृतेः जीवितधारा भवति।

## Assignments

**I. एकेन वाक्यद्वयेन वा उत्तरत -**

1. रूपकाणि कानि?
2. नाट्योद्देश्यं प्रति कालिदासेन किं उपवर्णितम्?
3. धनञ्जयस्य मतानुसारं किं नाम नाट्यम्?

4. रूपकस्य अवयवाः के?
5. केन दशरूपकाणि निर्दिष्टानि?
6. नाटकं नाम किम्? तस्य एकमुदाहरणं लिखत।

**II. उत्तरत**

1. साहित्यशास्त्रे दृश्यश्रव्यकाव्ययोः भेदं विविच्य लिखत।
2. काव्यस्य द्वे प्रमुखे प्रकारे स्तः दृश्यं श्रव्यं च - तयोः विशेषतां वर्णयत।
3. दृश्यकाव्यस्य प्राचीनतां प्रमाणैः सहितं दर्शयत।
4. नाट्यशास्त्रे दृश्यकाव्यस्य स्वरूपं कथं निरूपितम् इति उल्लिख्यताम्।
5. रूपकस्य स्वरूपं इतिहासं च वर्णयत।
6. दशरूपकाणि कानि? तेषां संक्षिप्तपरिचयो दातव्यः।
7. संस्कृतसाहित्ये दृश्यकाव्यानि महत्वपूर्णानि- वर्णयत।
8. दृश्यकाव्यं शिक्षायाः तथा मनोरञ्जनस्य साधनं भवति, विस्तरेण लेखं रचयत।
9. 'वेदाः सर्वविधज्ञानखनयः इत्याख्यायन्ते परन्तु त्रैवर्णिकमात्रलभ्याः, परं नाटकं पुनः सार्वजनिकतया ततो विशिष्यते' - विशदयत।

## Suggested Readings


1. Farley Richmond, Kuttiyatta, the Sanskrit theatre of India,University of Michigan Press, 2002
2. A. Berried Keith. The Sanskrit Drama on its origin development theory and practice, Motilal Banarsidass Publishers private Limited, 1992


## References

1. C. Rajendran. The Traditional Sanskrit theatre of Kerala, Publisher University of Calicut, 1989
2. K. P Narayana Pisharodi, Kuthampalagalilude (Malayalam)

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# Introduction To Sanskrit Theatre

## प्राचीनभारतीयनाट्यस्य उत्पत्तिः

## Learning Outcomes

- प्राचीनभारतीयनृत्यपरम्परायाः परिचयं संपादयन्ति।
- नाट्यशास्त्रस्य तत्त्वानां मूलभूतज्ञानं प्राप्स्यन्ति।
- नाट्यशास्त्रस्य उत्पत्तिमधिकृत्य ज्ञानं संपादयन्ति।

## Background

पूर्वस्मिन् एकके संस्कृतसाहित्यशास्त्रे काव्यस्य द्वौ भेदौ प्रदर्शितं - दृश्यश्रव्यकाव्यम्। दृश्यं काव्यं 'रूपकम्' इत्यपि कथ्यते। भारतीयसंस्कृतौ नाट्यकला धर्म-संस्कृति-शिक्षा-मनोरञ्जनस्य साधनरूपेण विकसितवती। नाटकं केवलं विनोदयुक्तं न, अपि तु लोकानां हिताय च। एतस्य माध्यमेन धर्मार्थकाममोक्षाः, जीवनस्य यथार्थप्रतिबिम्बं च प्रदर्श्यते। नाट्यशास्त्रे भरतमुनिना दश रूपकाणि निर्दिष्टानि, दशरूपकाणि नाट्यकलायाः समृद्धां परम्परां सूचयन्ति, यैः संस्कृतनाट्यं न केवलं कालातीतं कला, अपि तु भारतीयसंस्कृतेः जीवितधारा भवतीति इत्यादिविषयाः अधीतवन्तः। अस्मिन् एकके नाट्यस्योत्पत्तिम् अधिकृत्य विशदीकरिष्यामः।

SGOU

## Keywords

नाट्यशास्त्रं, भरतमुनिः, ब्रह्मणः, पञ्चमवेदः, ताण्डवं, लास्यम्, चतुर्वृत्तीनां समावेशं, रंगमञ्चः, वेदे, रामायण-महाभारते, अष्टाध्यायी, अर्थशास्त्रे, बौद्धग्रन्थे।

## Discussion

### 1.2.1 प्राचीनभारतीयनाट्यस्य उत्पत्तिः

साहित्यस्य अत्यन्तं महत्वपूर्णं अङ्गं भवति नाट्यम्। भारते नाट्यस्य उत्पत्तिः कथं जाता? केषु कमनीयोपादानेषु परिपुष्टं भूत्वा नाट्यकला विकसिताऽभवत्? एतेषु प्रश्नेषु विदूषाम् ऐकमत्यं नास्ति। अस्मिन् विषये भारतीयाः विद्वांसः तथा पाश्चात्याः विद्वांसः च भिन्नं मतं प्रतिपादयन्ति।

भारतीयपरम्परा - नाट्यस्य दैवी उत्पत्तिं स्वीकुर्वन्ति।

नाट्यशास्त्रानुसारं ब्रह्मणः कृपया नाट्यविद्या देवलोके उत्पन्ना

पाश्चात्यमतम् - समाजस्य विविधविकासपरिवर्तनानां तथा नाट्यतत्त्वानाम् आधारं कृत्वा संस्कृतनाट्यस्य उत्पत्तिं विवेचयन्ति। नाट्यशास्त्रानुसारं नाट्यविद्या देवलोके उत्पन्ना, ब्रह्मणः कृपया। नाट्यस्य उत्पत्तिं प्रति प्राचीनतमः मतः नाट्यशास्त्रे प्रथमाध्याये दृश्यते। त्रेतायुगस्य आदौ वैवस्वतमन्वन्तरे सर्वे देवताः ब्रह्माणम् उपगम्य एकं विशेषं क्रीडनीयकम् इच्छन्तः प्रार्थयन्ते- 'क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्'

ततः ब्रह्मा ध्यानयोगस्थितः भूत्वा चतुर्षु वेदेषु दृष्टिं स्थापयित्वा पञ्चमवेदस्य निर्माणं कृतवान्। ऋग्वेदात् पाठ्यभागः, सामवेदात् गीतभागः,यजुर्वेदात् अभिनयः अथर्ववेदात् रसः।

**'जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसान् आथर्वणादपि।।'**

नाट्यवेदः पञ्चमवेदः इति प्रसिद्धः

अयं नाट्यवेदः पञ्चमवेदः इति प्रसिद्धः अभवत्। शिवः ताण्डवं दत्तवान्, पार्वती लास्यम् दत्तवती, विष्णुः चतुर्वृत्तीनां समावेशं कृतवान्, ब्रह्मणः आदेशतः विश्वकर्मा रंगमञ्चस्य निर्माणं कृतवान्। ततः इन्द्रध्वजमहोत्सवे प्रशिक्षिताः नरनार्यः त्रिपुरदाहसमुद्र-मन्थननाट्यस्य प्रदर्शनं कृतवन्तः।

यद्यपि नाट्यशास्त्रे नाट्यस्य उत्पत्तिः एवं वर्ण्यते, तथापि आधुनिकः पाठकः एतत् पूर्णतः न स्वीकरोति। नाट्यशास्त्रस्य सूक्ष्म-जटिल-सर्वाङ्गीणतत्त्वानां विकासाय शताब्दीनाम् वा सहस्राब्दीनाम् आवश्यकता अस्तीति विद्वांसः मन्यन्ते। भारतीयनाट्यस्य उत्पत्तिः वैदिककालपर्यन्तं गच्छति। भारतीयसाहित्ये सर्वं वेदेषु अन्वेष्टुं प्रवृत्तिः दृढा अस्ति, यतः वेदाः सर्वप्राचीनः साहित्यनिधिः। यत्र यज्ञीयकर्मणि स्तुतिपाठः, संवादः, गीतं, नृत्यं च दृश्यते, तत्र नाट्यस्य मूलं द्रष्टुं शक्यते। ऋग्वेदे अनेकाः संवादात्मकाः सूक्ताः दृश्यन्ते - इन्द्र-मरुतसंवादः, पुरुरवा-उर्वशीसंवादः, यम-यमीसंवादः, अगस्त्य-लोपामुद्रासंवादः इत्यादयः।

### 1.2.1 संस्कृतनाट्यसाहित्यस्य विकासक्रमः

संस्कृतनाट्यसाहित्यस्य विकासः वैदिककालात् आरभ्य क्रमशः अभवत्।

#### (1) वैदिककालः

प्रो. इन्द्रपालसिंह "इन्द्र" महोदयः लिखति यत्- ऋग्वेदे सोमविक्रयस्य अवसरः अभिनयेन सह उल्लेखितः। महाव्रतस्तोतस्य समये कुमार्यः नृत्यगानपूर्वकं अग्निं प्रदक्षिणं कुर्वन्ति। शुक्लयजुर्वेदस्य वाजसनेयीसंहितायाः तृतीयोऽध्यायस्य षष्ठ्यां खण्डिकायां 'शैलूष'

संगीत, नृत्य, वाद्यस्य वैदिकयुगे विकसितस्थितिः नाटकविकासाय सर्वेऽपि उपादानाः तदा प्रचुररूपेण आसन्

इत्यस्य प्रयोगः दृश्यते। शैलूषः = अभिनेता। एकः सूतः नृत्याय, शैलूषः गीताय नियुक्तः। सामवेदे स्तोत्राणि रागबद्धानि। संगीत, नृत्य, वाद्यस्य वैदिकयुगे विकसितस्थितिः नाटकविकासाय सर्वेऽपि उपादानाः तदा प्रचुररूपेण आसन्।

**(2) रामायण-महाभारते नाट्यसंकेताः**

महाभारते 'रामायणनाटक', 'कौबेररंगाभिसार', विराटपर्वे रंगशाला तथा नटस्य प्रयोगः। रामायणे 'नट', 'नाट्य', 'रंग', 'नर्तक" इत्यादीनां उल्लेखः। पाणिनिना 'अष्टाध्याय्यां' 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' इत्यत्र नाटकस्य पूर्वरचनायाः संकेतः।

पाणिनीये कौटिल्यार्थशास्त्रे बौद्धग्रन्थेऽपि च नाट्यसाहित्यस्य विकासः अभवत्

**(3) कौटिल्यार्थशास्त्रे नाट्यकला**

कौटिल्यस्य 'अर्थशास्त्रे' नटः, नर्तकः, गायकः, वादकः, प्लवकः, कुशीलवः, सौमित्रः, चारणः च नाटकं कृत्वा जीविकोपार्जनं कुर्वन्ति।

**(4) बौद्धग्रन्थेषु नाट्यसंकेताः**

विनयपिटकस्य "चुल्लवग्गे" कथा- अश्वजितः पुनर्वसुः च अभिनयं दृष्ट्वा नर्तक्यः सह प्रेमालापं चक्रतुः। महास्थविरः तौ विहारात् निष्कासितवान्। अतः नाट्यकला तस्मिन्काले भारतव्यापी आसीत्।

## Summarised Overview

साहित्यस्य अत्यन्तं महत्वपूर्णं अङ्गं नाट्यम्। भारते नाट्यस्य एव उत्पत्तिः जाता। नाट्यशास्त्रानुसारं प्रथमं नाट्यविद्या ब्रह्मणः कृपया देवलोके उत्पन्ना। नाट्यस्य उत्पत्तिं प्रति प्राचीनतमः मतः नाट्यशास्त्रे प्रथमाध्याये दृश्यते। त्रेतायुगस्य आदौ वैवस्वतमन्वन्तरे सर्वे देवताः ब्रह्माणम् उपगम्य एकं विशेषं क्रीडनीयकम् इच्छन्तः प्रार्थयन्ते। ततः ब्रह्मा ध्यानयोगस्थितः भूत्वा चतुर्षु वेदेषु दृष्टिं स्थापयित्वा पञ्चमवेदस्य निर्माणं कृतवान्। ऋग्वेदात् पाठ्यभागः, सामवेदात् गीतभागः,यजुर्वेदात् अभिनयः अथर्ववेदात् रसः। अयं नाट्यवेदः पञ्चमवेदः इति प्रसिद्धः अभवत्। शिवः ताण्डवं दत्तवान्, पार्वती

लास्यम् दत्तवती, विष्णुः चतुर्वृत्तीनां समावेशं कृतवान्, ब्रह्मणः आदेशतः विश्वकर्मा रंगमञ्चस्य निर्माणं कृतवान्। यत्र यज्ञीयकर्मणि स्तुतिपाठः, संवादः, गीतं, नृत्यं च दृश्यते। तत्र नाट्यस्य मूलं द्रष्टुं शक्यते। ऋग्वेदे अनेकाः संवादात्मकाः सूक्ताः दृश्यन्ते - इन्द्र-मरुतसंवादः, पुरुरवा-उर्वशीसंवादः, यम-यमीसंवादः, अगस्त्य-लोपामुद्रासंवादः इत्यादयः। संगीत-नृत्य-वाद्यानां वैदिकयुगे विकसितस्थितिः जाता। नाटकविकासाय सर्वेऽपि उपादानाः तदा प्रचुररूपेण आसन्। पाणिनीये कौटिल्यार्थशास्त्रे बौद्धग्रन्थेऽपि च नाट्यसाहित्यस्य विकासः अभवत्।

## Assignments

**I. वाक्येन वाक्यद्वयेन वा उत्तरत-**

1. नाट्यवेदः पञ्चमवेदः इति प्रसिद्धः। कुतः?
2. नाट्यस्य मूलं कुत्र द्रष्टुं शक्यते?
3. कः पञ्चमोवेदस्य निर्माणं कृतवान्?

**II. उत्तरत-**

1. संस्कृतनाट्यसाहित्यस्य विकासक्रमः प्रमाणैः सहितं दर्शयत।
2. प्राचीनभारतीयनाट्यस्य उत्पत्तिं विवृणुत।
3. नाट्यशास्त्रानुसारं नाट्यस्य उत्पत्तिः कथं जाता?
4. पञ्चमोवेदः कः तस्य निर्माणं कथं जातम्?
5. ऋग्वेदे प्रतिपादितानि संवादात्मकाानि सूक्तानि कानि?

## Suggested Readings


1. Farley Richmond, Kuttiyatta, the Sanskrit theatre of India,University of Michigan Press, 2002

2. A. Berried Keith. The Sanskrit Drama on its origin development theory and practice, Motilal Banarsidass Publishers private Limited, 1992

## References

1. Govardhan Panchal. The Theatre of Bharata and some aspects of Sanskrit play production, Munshiran Manoharlal, Publishers PVT, 1996
2. Rachel Van Banner, James R Brandan. Sanskrit Drama in performance, Motilal Banarasi das Private limited, Delhi, 1993
3. Mani Madhava Chakyar. Natya Kalpadrumam, Kerala Kalamandalam Vallathol Nagar, National Book stall , Kottayam, 1975

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

SGOU

UNIT 3

# Bharata’s Natyasastra

## भरतस्य नाट्यशास्त्रम्

## Learning Outcomes

- नाट्यशास्त्रमधिकृत्य परिचयः।
- नाट्यशास्त्रस्य तत्त्वानां मूलभूतज्ञानं प्राप्स्यन्ति।
- नाट्यशास्त्रे प्रतिपादितानां प्रमुखविषयाणां ज्ञानं प्राप्स्यन्ति।

## Background

संस्कृतसाहित्यशास्त्रे नाट्यस्य उत्पत्तिः भरतस्य नाट्याशात्रात् आरब्धा। ब्रह्मा ध्यानयोगस्थितः भूत्वा चतुर्षु वेदेषु दृष्टिं स्थापयित्वा पञ्चमवेदस्य निर्माणं कृतवान्। ऋग्वेदात् पाठ्यभागः, सामवेदात् गीतभागः,यजुर्वेदात् अभिनयः अथर्ववेदात् रसः च जग्राह। तदेव नाट्यशास्त्रम्। अतः नाट्यशास्त्रं पञ्चमो वेदः इत्यपि कथ्यते। संगीत-नृत्य-वाद्यानां वैदिकयुगे विकसितस्थितिः जाता। नाटकविकासाय सर्वेऽपि उपादानाः तदा प्रचुररूपेण आसन्। पाणिनीये कौटिल्यार्थशास्त्रे बौद्धग्रन्थेऽपि च नाट्यसाहित्यस्य विकासः अभवदिति विषयाः अधीतवन्तः। संस्कृतनाटकशास्त्रमधिकृत्य विरचितः प्रामाणिको ग्रन्थो भवति भरतमुनेः नाट्यशास्त्रमित्यस्माभिर्दृष्टम्। नाट्यशास्त्रस्य प्रामाण्यं ज्ञातुं एतदेव पर्याप्तं भवति यत्, रूपकाणां रचनाविषये भरतमुनेः सिद्धान्तानां व्यतिक्रमः न केनाऽप्यङ्गीक्रियते। भासनाटकेषु भरतमुनेः

SGOU

सिद्धान्तानां निष्कर्षतयाऽवलम्बनं न दृश्यत इत्यस्मात्, भासः भरतात्पूर्ववर्तीति मन्यत इत्यस्माभिर्द्दष्टञ्च। काव्येषु तज्जीवातुभूतस्य रसस्योत्पत्तिमधिकृत्य "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" (ना. शा. 6/32) इति भरतमुनिना प्रोक्तं रससूत्रं अद्यापि, न केवलं नाटकस्य, अपि तु समस्तस्यापि साहित्यप्रपञ्चस्य मार्गनिदेशकं निकषायमाणञ्च विराजते। अभिनवगुप्तपादेन कृता अभिनवभारती नाम व्याख्या चास्य महिमानं शतगुणमकरोदित्येतद् भारतीयकाव्यशास्त्रप्रपञ्चस्य सौभाग्यातिरेक एव। इदानीं भरतस्य नाट्यशास्त्रमधिकृत्य पठामः।

## Keywords

पञ्चमोवेदः, रसाः, अभिनयः, रंगमञ्चः, रूपकाणि, उपरूपकाणि, वस्तु, नेता, पात्राणि, नान्दीपाठः, प्रस्तावना, भरतवाक्यम्।

## Discussion

### भरतस्य नाट्यशास्त्रम्

भारतीयनाट्यस्य प्रमुखं शास्त्रं नाट्यशास्त्रम् अस्ति, यत् भरतमुनिना रचितम्। एषः ग्रन्थः पञ्चमवेदः इति अपि कथ्यते, यतः अस्मिन्ग्रन्थे ऋग्वेदस्य पाठ्यं, यजुर्वेदस्य अभिनयः, सामवेदस्य गीतं, अथर्ववेदस्य रसः च समाहितः अस्ति।

### 1.3.1 नाट्यशास्त्रस्य उत्पत्तिः

भरतमुनेः नाट्यशास्त्रे नाट्यस्योत्पत्तिं प्रतिपादितमस्ति। कृतयुगे जनाः प्रायेण धर्मिष्ठाः एवाऽसन्। कृतयुगापगमे लोके धर्मस्य ग्लानिरजायत।

जनाश्च प्रायेण ग्राम्यधर्मनिरताः कामलोभवंशवदाः चाऽभवन्। तदानीं इन्द्रप्रमुखाः देवाः ब्रह्माणमुपेत्य लोकेषु धर्माभिमुख्यं सुसंस्थापयितुं योग्यं दृश्यश्रव्यात्मकं किमपि क्रीडनीयकमपृच्छन् – "क्रीडनीयकमिच्छामो दृश्यं श्रव्यञ्च यद्भवेत्" (ना. शा. 1/17) इति। तदानीं ब्रह्मा चतुर्भ्योऽपि वेदेभ्यः एकैकमंशमादाय नाट्यवेदं चकार। तदुक्तं नाट्यशास्त्रेः -

**'जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।**

**यजुर्वेदादभिनयान् रसानथर्वणादपि'।।** (ना. शा.1/17) इति।

अत्रोक्तं स्पष्टमेव यत् नाट्यद्वारा वेदाध्ययनाय अवसरमलब्धवतामपि वैदिकाशयानां प्रापणाय अवसरो लभ्यत इति। एवमेव, नाट्ये न केवलं पाठ्यरूपं साहित्यं अपि तु गीतं, अभिनयः,रसाश्चापि सम्मिलिता विराजन्त इत्यपिज्ञातुं शक्यते। एतेनैव विविधानां कलानां समञ्जससन्निवेशयुक्ते नाटके सहृदयानां सविशेषा प्रीतिरस्ति। अभिनयद्वारा काव्यार्थावगमः अनायासेनैव जायत इत्येतदपि नाटकस्य जनप्रियत्वस्य निदानम्। नाटकेषु न केवलं वैदिकानाम् आशयानाम् अपि तु लोकेषु विद्यमानानां कलाशिल्पविद्यादीनां सर्वेषामपि सन्निवेशोऽपि विद्यते। तदुक्तं भरतमुनिना

**'न तज्ज्ञानं न तच्छिल्पं न सा विद्या न स कला।**

**न स योगो न तत्कर्मनाटके यन्न दृश्यते'।।**(ना.शा.1/116)इति।

नाट्यं पञ्चमवेदरूपेण सर्वशास्त्राणां मूलं भवति

सर्वमेतत्, काव्यभेदेषु नाटकं श्रेष्ठमिति स्पष्टयति। एवंजनप्रियसाहित्य-रूपस्य नाटकस्य शास्त्रमधिकृत्य परिचिन्तनमस्माभिः करणीयमेव। भरतमुनिः कथयति यत् नाट्यविद्या ब्रह्मणः कृपया सृष्टा, लोकरञ्जनाय तथा शिक्षाय इयं विद्या भरतमुनेः प्रदत्ता।

**'वेदान् पञ्चमं नाट्यं सर्वशास्त्रप्रवर्तकम्।**

**सर्ववर्णानां सुखदं नात्यत्रास्ति विचारणा'॥**

(अर्थः- नाट्यं पञ्चमवेदरूपेण सर्वशास्त्राणां मूलं भवति। एतत् सर्ववर्णानां हिताय रचितम्।)

### 1.3.2 नाट्यशास्त्रस्य प्रमुखविषयाः

भरतमुनेः नाट्यशास्त्रे नाट्यस्य सर्वेऽपि अंगाः विस्तरेण वर्णिताः।

#### 1.3.2.1 रससिद्धान्तः

नाट्यशास्त्रे रसस्य विशेषमहत्त्वं विद्यते। रसः तादृशः भावः अस्ति, यः दर्शकानां चित्ते विशेषप्रतिपत्तिं जनयति।

**भरतमुनिना निर्दिष्टाः नवरसाः -**

नवरसाः

1. शृङ्गारः (प्रेम, सौन्दर्य)
2. हास्यः (हास्यम्)
3. करुणः (दुःखम्)
4. रौद्रः (क्रोधः)
5. वीरः (पराक्रमः)
6. भयानकः (भयम्)
7. बीभत्सः (जुगुप्सा)
8. अद्भुतः (आश्चर्यम्)
9. शान्तः (शान्तिः)

#### 1.3.2.2 अभिनयस्य प्रकाराः

भरतमुनिना अभिनयस्य चत्वारः प्रकाराः निर्दिष्टाः –

चत्वारः अभिनयाः

1. आङ्गिकम् अभिनयः - शारीरिकहावभावाः, हस्तमुद्राः च।
2. वाचिकम् अभिनयः - संवादः, स्वरः, उच्चारणं च।

3. सात्त्विकम् अभिनयः - आन्तरिकभावनाः, अश्रु, कम्पनं च।

4. आहार्यम् अभिनयः - वस्त्रभूषणादयः।

**1.3.2.3 रंगमञ्चविधानम्**

भरतमुनिः नाट्यशास्त्रे रंगमञ्चस्य त्रिविधानि रूपाणि वर्णितानि –

त्रिविधाः रंगमञ्चाः

1. विकृष्टमण्डपः - विशालमञ्चः।

2. चतुरश्रमण्डपः - चतुर्भुजाकृति।

3. त्र्यश्रमण्डपः - त्रिकोणीयमञ्चः।

**1.3.2.4 नाट्यस्य भेदाः**

1. रूपकाणि (१० प्रकाराः) – यथा नाटकं, प्रकरणम्, भाणः, प्रहसनम्, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनम्

रूपकाणि दश, उपरूपकाणि अष्टादश

2. उप रूपकाणि (१८ प्रकाराः) – यथा नाटिका त्रोटकम् गोष्ठी, सट्टकम्, नाट्यरासकम्, प्रस्थानम्, उल्लाप्यम्, काव्यम्, प्रेङ्खणम्, रासकम्, संलापकम्, श्रीगदितम्, शिल्पकम्, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका

**1.3.3 नाट्यशास्त्रस्य प्रभावः**

भरतमुनेः नाट्यशास्त्रं केवलं संस्कृतनाट्यस्य आधारशास्त्रं न, अपि तु सम्पूर्णे भारतीयनाट्यपरम्परायाः मूलं अस्ति। लोकनाट्यरूपाणि- यक्षगानम्, कथकली, कुटियाट्टम्, रामलीला इत्यादयः अपि अस्य प्रभावं वहन्ति।

नाट्यशास्त्रं भारतीयसंस्कृतेः आत्मा इति कथ्यते

भरतमुनेः नाट्यशास्त्रम् केवलं नाट्यकला न, अपितु समाजस्य अध्ययनं, भावनां विश्लेषणं, तथा धर्म-संस्कृतिः-मनोरञ्जनानाम् अद्भुतसमन्वयः अस्ति। अद्यतनकाले अपि नाट्यशास्त्रस्य सिद्धान्ताः

आधुनिकनाट्ये प्रासङ्गिकाः भवन्ति। अतः, नाट्यशास्त्रं भारतीयसंस्कृतेः आत्मा इति कथ्यते।

### 1.3.4 संस्कृतनाट्यस्य विशेषताः

संस्कृतनाट्यं लोकरंजनस्य साधनं भवति, तथा तत् धर्मं, नैतिकतां, समाजस्य सिद्धान्तान् च बोधयति। तस्याः प्रमुखाः विशेषताः एते-

संस्कृतनाट्यस्य विशेषताः - रससिद्धान्तः, संयुक्तकलारूपम्, अध्यात्मिकता तथा नैतिकता, नायकारूपाणि

**रससिद्धान्तः** - संस्कृतनाट्ये रसः अतिमहत्वपूर्णः। नवरसाः (शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, शान्तः) भावानां सम्प्रेषणं कुर्वन्ति।

**संयुक्तकलास्वरूपम्** - संस्कृतनाट्यं न केवलं अभिनयपरं भवति, अपि तु तत्र गीतं, नृत्यं, वाचिकं च अभिनयः समाहितः अस्ति।

**अध्यात्मिकता तथा नैतिकता** - संस्कृतनाटकानि केवलं सांसारिककथनं न, अपि तु धर्मस्य, नैतिकतायाः, समाजस्य च संवाहकानि सन्ति।

**नायकभेदाः** - संस्कृतनाट्ये चत्वारः नायकाः भवन्ति - धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरोशान्तः।

### 1.3.5 प्रमुखाः रूपककर्तारः तथा रूपकाणि

संस्कृतनाट्यस्य विकासे कतिपयाः रूपककर्तारः महत्त्वपूर्णं योगदानं कृतवन्तः। तेषां रूपकाणि अद्यापि प्रसिद्धानि –

प्रमुखरूपककर्ताराः - भासः, कालिदासः, शूद्रकः, भवभूतिः विशाखदत्तः,

भासः - स्वप्नवासवदत्तम्, प्रतिज्ञायौगन्धरायणम्।

कालिदासः - अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्नि-मित्रम्।

शूद्रकः - मृच्छकटिकम्।

भवभूतिः - उत्तररामचरितम्, मालतीमाधवम्।

विशाखदत्तः - मुद्राराक्षसम्।

### 1.3.6 प्राचीननाट्यपरंपरायाः प्रभावः

संस्कृतनाट्यस्य प्रभावः केवलं प्राचीनभारतस्य न, अपि तु सम्पूर्णे भारतदेशे दृश्यते। कुटियाट्टम्, कथाकेलीः, यक्षगानम्, तमिलः कोत्त्, असमीयः अंकिया नाट इत्यादयः संस्कृतनाट्यस्य आधुनिकरूपाः सन्ति।

### 1.3.7 संस्कृतनाटकस्य विशेषताः

संस्कृतसाहित्ये प्रमुखानां नाटकानां अध्ययनात् निम्नलिखिताः विशेषताः दृश्यन्ते—

**(१) वस्तुनेतारसानां प्रमुखत्वम्**

संस्कृतनाटकेषु वस्तु (कथावस्तु), नेता (पात्राणि), रसः (भावप्रेरणम्) इत्येतेषां प्रमुखत्वं विद्यते। एतेषां भेदानुसारं रूपकस्य दश भेदाः निर्दिष्टाः। 'वस्तु नेता रसस्तेषां भेदकः।' नाटकः प्रथमः भेदः।

**(२) कथावस्तु - ऐतिहासिकं पौराणिकं वा**

कथावस्तु - ऐतिहासिकं, पौराणिकं

रामायण-महाभारतादीनां कथाः नाटकानां आधाररूपेण स्वीकृता।

ऐतिहासिक-पौराणिकप्रसंगानां आधारेण बहूनि नाटकानि रचितानि।

**(३) पात्रनिर्धारणम्**

कथानुकूलं पात्रनिर्माणं कृतम्। समाजस्य सर्वे वर्गाः नाटकेषु दृष्टव्याः, 'मृच्छकटिके' यथा।

**(४) रसप्रधानता**

प्रधानरसः - श्रृङ्गारः वीरः वा

रसः नाट्यस्य मुख्यलक्ष्यम्। यथार्थताम् अपेक्ष्या रससंवेदनायाः अधिकं महत्वं। कवीनां सफलतायाः मानदण्डः रसाभिव्यक्तिः। प्रधानरसः –

श्रृंगारः वीरःवा । सहायकरसाः अपि यथासम्भव प्रयुक्ताः। इतरे रसाःअङ्गरूपेण।

**(५) नाट्यशास्त्रीयानुसरणम्**

नान्दीपाठः, प्रस्तावना (स्थापना) नाटकस्य आरम्भे। 'भरतवाक्यम्' अन्ते।

**(६) अङ्कसंख्या**

५-७ अङ्काः साधारणतः। बहुषु नाटकेषु ६ -७ अङ्कानि सन्ति।

**(७) पात्रानुसारं भाषाविनियोगः**

उत्तमपात्राणि संस्कृतभाषा अन्यपात्राणि- प्राकृतभाषा

उत्तमपात्राणि – संस्कृतं। अन्यपात्राणि – प्राकृतभाषा।

**(८) अभिनेयता**

संवादयोजना आकर्षकः। काव्यत्वस्य आधिक्येन 'काल-देशयोः अन्वयः' न दृश्यते।

अरस्तुविरचितानां "Unities of Time and Place" (काल-स्थानैकता) इत्यस्य न्यूनता।

**(९) सुखान्तता-दुःखान्तता**

संस्कृतनाटके अधिकांशाः सुखान्ताः

अधिकानि संस्कृतनाटकानि सुखान्ताः।

दुःखान्तनाटकानामपि अस्तित्वम्—

'कर्णभारम्, उरुभङ्गम्, वेणीसंहारम्, "चण्डकौशिकः'। एतेषु नायकस्य शोकः, पराभवः, मृत्युश्च चित्रिताः।

## Summarised Overview

भरतमुनिना रचितं नाट्यशास्त्रं भारतीयनाट्यस्य प्रमुखं शास्त्रं अस्ति। एषः ग्रन्थः पञ्चमवेदः इति अपि कथ्यते। लोकेषु धर्माभिमुख्यं सुसंस्थापयितुं ब्रह्मा चतुर्भ्योऽपि वेदेभ्यः एकैकमंशमादाय नाट्यवेदं चकार। नाट्ये न केवलं पाठ्यरूपं साहित्यं अपि तु गीतं, अभिनयं, रसांश्चापि सम्मिलिता विराजन्त इत्यपिज्ञातुं शक्यते।

नाट्यशास्त्रस्य प्रमुखविषयाः - रससिद्धान्तः - भरतमुनिना नवरसाः निर्दिष्टाः, द्वितीयः विषयः - अभिनयस्य प्रकाराः - तेन चत्वारः प्रकाराः अभिनयः निर्दिष्टाः, तृतीयः विषयः - रंगमञ्चविधानं - तेन त्रिविधानि रंगमञ्चनानि निर्दिष्टानि। भरतमुनिना नाटकस्य द्विविधभेदाः विभक्ताः - रूपकाणि, उपरूपकाणि इति।

नाट्यशास्त्रस्य प्रभावैः यक्षगानम्, कथाकेलीः, कुटियाट्टम्, रामलीला इत्यादीनि अपि संजातानि। भरतमुनेः नाट्यशास्त्रम् केवलं नाट्यकला न, अपि तु समाजस्य अध्ययनं, भावनां विश्लेषणं, तथा धर्म-संस्कृति-मनोरञ्जनानाम् अद्भुतसमन्वयः अस्ति। अद्यतनकाले अपि नाट्यशास्त्रस्य सिद्धान्ताः आधुनिकनाट्ये प्रासङ्गिकाः भवन्ति। अतः, नाट्यशास्त्रं भारतीयसंस्कृतेः आत्मा इति कथ्यते। रससिद्धान्तः, संयुक्तकलास्वरूपम्, अध्यात्मिकता तथा नैतिकता, नायकरूपाणि एते संस्कृतनाट्यस्य प्रमुखाः विशेषताः भवन्ति। रूपकाणि उपरूपकाणि च संस्कृतनाट्यस्य द्विविधप्रकारौ स्तः। भासकालिदासादयः संस्कृतनाटकस्य प्रमुखरूपककर्त्ताराः भवन्ति। वस्तु-नेतृ-रसाः इत्येताः संस्कृतनाटकस्य विशेषताः।

## Assignments

**I. वाक्येन वाक्यद्वयेन वा उत्तरत -**

1. नाट्यशास्त्रे प्रमुखाः विषयाः के?
2. नवरसाः के?

3. अभिनयस्य प्रकाराः कतिविधाः? ते के?

4. उपरूपकाणि कानि?

5. भरतमुनेः नाट्यशास्त्रानुसारं संस्कृतनाट्यं कतिविधम्?

6. संस्कृतनाट्यस्य आधुनिकरूपाः के?

7. उत्तमपात्राणि प्रयुक्ता भाषा का?

8. दुःखान्तनाटकानि कानि?

9. संस्कृतनाटकस्य विशेषताः काः?

**II. उत्तरत -**

1. नाट्यशास्त्रं भारतीयसंस्कृतेः आत्मा इति कथ्यते-विशदयत

2. संस्कृतनाटकस्य विशेषताः काः? विशदयत।

3. भरतस्य नाट्यशास्त्रम् अधिकृत्य प्रतिपादयत।

4. नाट्यशास्त्रस्य उत्पत्तिम् अधिकृत्य टिप्पणीं लिखत।

5. नाट्यशास्त्रस्य प्रमुखाः विषयाः के? विशदयत।

6. प्रमुखपञ्चसंस्कृतरूपककर्त्तारः के? तेषां नाटकानि कानि?

## Suggested Readings


1. Farley Richmond, Kuttiyatta, the Sanskrit theatre of India,University of Michigan Press March 18, 2002

2. A. Berried Keith. The Sanskrit Drama on its origin development theory and practice, Motilal Banarsidass Publishers private Limited, 1992


## References


1. Dr K.G Paulose. Kudiyattam, Green Books Private Limited, 2020

2. C Rajendran Ed, Living traditions of Natyasastra, New Bharatiya Book corporation, 2002
3. Govardhan Panchal. The Theatre of Bharata and some aspects of Sanskrit play production, Munshiran Manoharlal, Publishers PVT, 1996

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# Abhinavagupta - Sarngadhara - Abhinayadarpana - Hastalaksana Dipika - Balaramabharata - Kerala Theatre

## नाट्यशास्त्रतत्त्वानि

## Learning Outcomes

- नाट्यशास्त्रस्य तत्त्वानां मूलभूतज्ञानं प्राप्स्यन्ति ।
- प्रमुखेषु नृत्यशास्त्रीयग्रन्थेषु (नाट्यशास्त्र, अभिनयनदर्पण इत्यादिषु) उल्लिखितानां सिद्धान्तानाम् अध्ययनं कर्तुं प्रभवन्ति ।
- केरलीयनाट्यशास्त्रं परिचिनोति ।

## Background

भारतीयनाट्यस्य प्रमुखं शास्त्रं भरतमुनिना रचितं नाट्यशास्त्रं अस्ति। ब्रह्मणः कृपया भरतमुनिना नाट्यशास्त्रम् अरचयत्। तस्मिन् ग्रन्थे प्रतिपादिताः प्रमुखाः विषयाः के ? संस्कृतनाट्यस्य विशेषताः काः? संस्कृतनाटकस्य विशेषताः काः? इत्यादि विषयाः गतैकके अस्माभिः अधीतम् ।

भारतस्य महत्वपूर्णः दार्शनिकः तन्त्रविद् अभिनवगुप्तः, संगीतशास्त्रस्य आचार्यः शार्ङ्गदेवः, अभिनयदर्पणस्य कर्ता नन्दिकेश्वरः, हस्तचेष्टान् प्रतिपादितः ग्रन्थः हस्तलक्षणदीपिका, शक्तिभद्रस्य आश्चर्यचूडामणिः रविवर्माकुलशेखरेण रचितं प्रद्युम्नाभ्युदयनाटकम् इत्यादिविषयाः अस्मिन् एकके पश्यामः।

## Keywords

अभिनवभारती, काव्यशास्त्रज्ञः, तन्त्रविदः, संगीतरत्नाकरः, नन्दिकेश्वरः, मुद्राः, शक्तिभद्रः, शङ्कराचार्यः, रविवर्मा।

## Discussion

### 1.4.1 अभिनवगुप्तः

अभिनवगुप्तः दार्शनिकः, काव्यशास्त्रज्ञः, तन्त्रविदः च आसीत्

अभिनवगुप्तः भारतस्य कश्चन महत्त्वपूर्णः दार्शनिकः, काव्यशास्त्रज्ञः, तन्त्रविद् च आसीत्। सः कश्मीरदेशस्य प्रख्यातः विद्वान् आसीत्, यः दशमशताब्दे निवसति स्म। तस्य योगदानं विशेषतः तन्त्रस्य, दर्शनस्य, तथा साहित्यस्य च क्षेत्रेषु अत्यन्तं गम्भीरं विद्यते। अभिनवगुप्तस्य प्रसिद्धः ग्रन्थः भवति 'अभिनवभारती' इति ख्यातः, यत् भरतस्य 'नाट्यशास्त्रस्य' परं भाष्यरूपेण गण्यते। अस्मिन् ग्रन्थे सः रससिद्धान्तं स्पष्टं निरूपयति। तस्य मतानुसारं रसः केवलं सहृदयस्य हृदये उत्पन्ना अनुभूतिः भवति, न तु केवलं बाह्यव्याख्याने। सः केवलं नाट्यशास्त्रे एव न, अपि तु 'तन्त्रालोकः' इत्यस्मिन् ग्रन्थे काश्मीरशैवदर्शनस्य विस्तृतं विवरणं दत्तवान्। अस्मिन् ग्रन्थे सः तन्त्रस्य गूढतत्त्वानि प्रतिपादयति तथा शिवतत्त्वस्य रहस्यं व्याख्याति। अभिनवगुप्तस्य विचाराः केवलं तस्य समये न, अपि तु अद्यापि भारतीयदर्शनस्य, काव्यशास्त्रस्य, तन्त्रस्य च अध्ययनाय अत्यन्तं उपयुक्ताः भवन्ति। सः बहुप्रतिभाशाली आचार्यः आसीत्, यस्य ग्रन्थाः भारतीयतत्त्वशास्त्र-परम्परायां स्थायीमूल्यं धारयन्ति।

### 1.4.2 शार्ङ्गदेवः

शार्ङ्गदेवः भारतीयसंगीतशास्त्रस्य महत्त्वपूर्णः आचार्यः आसीत्। सः १२-१३ शतके यादवराजसिंहणदेवस्य (१२१०-१२४७ ई.) राजसभाविद्वान् आसीत्। तस्य प्रसिद्धः ग्रन्थः "संगीतरत्नाकरः" भारतीयसंगीतस्य सर्वतोमुखं विवेचनं करोति। शार्ङ्गदेवः कश्मीरदेशे जन्म प्राप्तवान्। तस्य कुलं कश्मीरात् महाराष्ट्रं प्रति आगतं, विशेषतः देवगिरिनगरम् (वर्तमानं दौलताबाद, महाराष्ट्र)। तस्य पिता सोमेश्वरः अपि एकः विद्वान् आसीत्। सः राज्ञः सिंहणदेवस्य दरबारे (यादववंशः, देवगिरि) संगीताचार्यरूपेण प्रतिष्ठितः। शार्ङ्गदेवस्य प्रमुखः ग्रन्थः – 'संगीतरत्नाकरः।' 'संगीतरत्नाकरः' भारतीयसंगीतशास्त्रस्य प्रमाणग्रन्थः अस्ति। अस्मिन् वैदिकसंगीतं, नाट्यसंगीतं, लोकसंगीतंश्च विस्तरेण प्रतिपादितः अस्ति। अस्य ग्रन्थस्य सप्ताध्यायाः भवन्ति।

शार्ङ्गदेवस्य "संगीतरत्नाकरः" भारतीयसंगीतशास्त्रस्य प्रमाणग्रन्थः अस्ति

### 1.4.3 संगीतशास्त्रे शार्ङ्गदेवस्य योगदानम्

**(1) सप्तस्वराणां उत्पत्तिः**

शार्ङ्गदेवः सप्तस्वराणां उत्पत्तिं विभिन्नजीवेषु सम्बद्धं वर्णयति -

सप्तस्वराः

षड्जः (सा) – मयूरस्य शब्दात्।

ऋषभः (री) – गोवृषभस्य नादात्।

गान्धारः (गा) – अजस्य ध्वनितः।

मध्यमः (म) – क्रौञ्चपक्षिणः नादात्।

पञ्चमः (प) – कोकिलस्य गीतात्।

धैवतः (ध) – अश्वस्य हिन्हिनात्।

निषादः (नि) – हस्तिनः गर्जनात्।

**(2) मार्गी-देशी संगीतस्य भेदः**

मार्गीसंगीतं – वैदिक एवं शुद्धशास्त्रीयसंगीतः।

देशीसंगीतं – जनसाधारणप्रियं, लोकप्रचलितं संगीतं।

**(3) रागवर्गीकरणम्**

ग्रामा, मूर्च्छना,जाति - तया रीत्या रागाणां वर्गीकरणं क्रियते

शार्ङ्गदेवः रागाणां वर्गीकरणं चकार,

यथा – ग्रामा – शुद्धसंगीतस्य मूलाधारः।

मूर्च्छना – स्वराणां विशेषक्रमः।

जाति – प्राचीनरागाणां रूपम्।

रागभेदाः – संगीतपरंपरायाः अनुसारेण विभिन्नवर्गीकरणम्।

### 1.4.4 शार्ङ्गदेवस्य प्रसिद्धाः श्लोकाः

**(1) संगीतस्य महत्त्वम्**

'यत्र नार्यस्तु पूज्यन्ते, तत्र रम्यं गृहे गृहम्।

यत्र गीतं च वाद्यं च, तत्र देवाः सहायिनः॥'

संगीतस्य महत्वं, रागाणां प्रभावमधिकृत्य श्लोकाः रचिताः

**(2) रागाणां प्रभावः**

'रागः प्रीतिकरः प्रोक्तः, सर्वलोकहिताय च।

रञ्जयत्येव यः श्रोतॄन्, स एव रागतां गतः॥'

### 1.4.5 संगीतरत्नाकरस्य प्रभावः

उत्तरभारतीयसंगीतस्य (हिन्दुस्थानी) तथा दक्षिणभारतीयसंगीतस्य (कर्णाटक) परंपरायाः आधारभूतः ग्रन्थः भवति संगीतरत्नाकरः। भारतीयसंगीतस्य सर्वविस्तृतमयं शास्त्रीयग्रन्थः। संगीतरत्नाकरस्य आधारशिलायाः उपरि संगीतसिद्धान्ताः विकसिताः। अयं ग्रन्थः भारतीयसंगीतविद्भिः साकूतं पठ्यते।

### 1.4.6 अभिनयदर्पणम्

नङ्ग्यार्कूत्तः उत्पत्तिः प्राचीनकाले कूटियाट्टस्य सन्दर्भे दृश्यते। अत्र नङ्ग्यारः कूटियाट्टस्य "विदूषिका" अथवा "सूत्रधारिका" इव भूमिकां निर्वहति, परन्तु नङ्ग्यर्कूत्ति केवलं एकाकिन्या स्त्रिया अभिनयं दृश्यते।

नङ्ग्यार्कूत्ति केवलं एकाकिन्या स्त्रिया अभिनयं दृश्यते

चक्रवाक-नकुल-तिलकं-मुकुल-आलाप-लोल-लील-लास्य नयनाभिनयैः सह अयं कूत्तुरूपः सौन्दर्यं, रसपरिपाकं च दर्शकाणां हृदि स्थापयति।

नङ्ग्यार्कूत्ति विशेषरूपेण श्रीमद्भागवते वर्णिताः स्त्रियो स्त्रीकथाः वा नाट्यरूपेण प्रस्तूयन्ते। मुख्यतः श्रीकृष्णचरितं, प्रह्लादचरितं, ध्रुवचरितं इत्यादयः भागवतवृत्तान्ताः अत्र प्रायः द्रष्टुं शक्यन्ते।

एषा प्रस्तुति बहुधा मण्डपे, कूत्तम्बलम् इत्याख्ये विशेषस्थले, दीर्घकालेन-प्रायः सप्तदिनपर्यन्तं-प्रवर्तते। संस्कृतम् अत्र प्रधानभाषा अस्ति। परन्तु यदा नङ्ग्यारः विवेचनं करोति, तदा मलयालभाषायाः अंशांश्च प्रस्तौति, येन दर्शकसामान्यः अपि तदर्थं मनसि कर्तुं शक्नोति। अत्र एकैव नायिका सम्पूर्णं नाट्यं वहति। मुखप्रत्यायिका, नयनाभिनयः, हस्तमुद्राः च सम्पूर्णानुभावप्रदर्शकत्वेन उपयुज्यन्ते। पद्यानि संस्कृतश्लोकरूपेण गीयन्ते, लयबद्धं वादनं च तत्र सहचरति।

एषा प्रस्तुति बहुधा मण्डपे, कूत्तम्बलम् इत्याख्ये विशेषस्थले, दीर्घकालेन-प्रायः सप्तदिनपर्यन्तं-प्रवर्तते

नङ्ग्यार्कूत्त् केवलं कलारूपं न, अपि तु स्त्रीशक्तेः, धर्मभक्तेः, सांस्कृतिकपरम्परायाः च अद्वितीयं उदाहरणम्। केरलस्य नाट्य-

कल्पलतायाम् अयं एकं मणिमयं पुष्पम् इव दृश्यते। एवं नङ्ङ्यार्कूत्त् एकं स्त्रीप्रधानं, धार्मिकवृत्तान्तपरम्परायुक्तं, संस्कृतनाट्यरूपं भवति। अस्मिन् सौन्दर्यं, भावः, लयः च एकत्र समन्विताः। एषा कला केवलं दर्शनीया न, अपि तु शिक्षायै, भक्ति-सम्वर्धनाय, सांस्कृतिकसंरक्षणाय च एकं प्रभावशालि साधनं भवति।

### 2.2.5. कूटियाट्टम्

नृत्तस्वरूपं कूटियाट्टम्, यूनेस्को संस्थया मान्यतां प्राप्तं भारतीयं नाट्यरूपम् अस्ति।

नृत्तस्वरूपं भवति कूटियाट्टम्, यत् यूनेस्को संस्थया मान्यतां प्राप्तं भारतीयं नाट्यरूपम् अस्ति। अभिनयस्य गम्भीरं ध्यानं अत्र अस्ति, तस्मात् कूटियाट्टं "अभिनयस्य जननी" इति उच्यते। अद्यत्वे अस्य नाट्यशैली अष्टशतवर्षाधिकः प्राचीनः अस्ति। प्राचीनतमेषु संस्कृतनाट्यरूपेषु एषः एकः अस्ति। एकस्य कूटियाट्टनाट्यस्य पूर्णरूपेण प्रस्तुतीकरणाय एकचत्वारिंशत् दिनानि अपेक्ष्यन्ते। संस्कृतनाटकानां केरलस्थानीयाभिनयरूपाणां च संयोगेन कूटियाट्टं विशिष्टं दृश्यकलारूपं भवति। पूर्वकालिके चाक्यार्-नाट्ये एकः एव अभिनेता अभिनयं करोति स्म, किन्तु शनैः शनैः अन्यानि अपि पात्राणि संलग्नानि अभवन्, एवं कूटियाट्टं बहुपात्रात्मकं नाट्यरूपं अभवत्। कूटियाट्टं केरलराज्ये प्राचीनतमं संस्कृतनाट्यरूपं अस्ति, यत् भारतस्य नाट्यशास्त्राधारितं जीवद्रूपं नाट्यपरम्परायाः एकं अद्वितीयं उदाहरणं भवति। एषः नाट्यरूपः "कूटियाट्टं" इति शब्देन निर्दिश्यते, यः "सहाभिनयः" इत्यर्थं वहति, यत्र एकाधिकाः पात्राणि एकत्र मिलित्वा अभिनयं कुर्वन्ति।

एषः नाट्यरूपः केरलस्य देवालयेषु स्थितेषु कूत्तम्बलं नामकविशेषमञ्चेषु प्रदर्श्यते

कूटियाट्टस्य इतिहासः द्विसहस्रवर्षात् पूर्वं यावत् प्रतिपद्यते। एषः नाट्यरूपः केरलस्य देवालयेषु स्थितेषु कूत्तम्बलं नामकविशेषमञ्चेषु प्रदर्श्यते। प्रारम्भे, एषः नाट्यः चाक्यार्-नम्ब्यार् समुदाययोः पुरुषैः अभिनीतः, यत्र चाक्याराः पुरुषपात्राणि, नम्ब्यार्

स्त्रियः स्त्रीपात्राणि च अभिनीयन्ते। नम्ब्यार् समुदायस्य स्त्रियः नङ्ङ्यार् इत्युच्यन्ते, याः गीतगायनं च तालवाद्यं च कुर्वन्ति।

कूटियाट्टं नाट्यशास्त्रस्य सिद्धान्तानुसारं नाट्यप्रदर्शनं करोति। नाट्यशास्त्रे निर्दिष्टाः अभिनयविधयः, नेत्राभिनयः, हस्तमुद्राः च कूटियाट्टे विशेषतया पालनं कुर्वन्ति। अभिनयस्य मुख्यं साधनं नेत्राभिनयः अस्ति, यः पात्रस्य भावनां सूक्ष्मतया प्रकटयति। कूटियाट्टं नाट्यरूपे प्रायः संस्कृतनाटकानि, विशेषतः कालिदासस्य, भासस्य च कृतयः, प्रस्तूयन्ते। एकैकस्य नाटकस्य प्रदर्शनं बहुदिनानि यावत् प्रवर्तते, यत्र एकस्मिन् अङ्के पात्रस्य पूर्वजीवनं, भावनाः च विस्तृतरूपेण प्रदर्श्यन्ते।

कूटियाट्टे विषये एका संस्कृतकृतिः अस्ति - "नाटकङ्कुशः"। एषा कृतिः कूटियाट्टस्य आलोचनात्मकदृष्ट्या लिखिता, यत्र एतस्य नाट्यरूपस्य दोषाः, विकृतयः च विवेच्यन्ते। तथापि, एषा कृतिः कूटियाट्टस्य ऐतिहासिकं, सांस्कृतिकं च परिप्रेक्ष्यं बोधयति।

केरलकलामण्डलं, अम्मन्नूर् गुरुकुलम्, मार्गी इत्यादयः संस्थाः कूटियाट्टस्य शिक्षायै, संरक्षणाय च कार्यं कुर्वन्ति। कूटियाट्टं केरलस्य संस्कृतनाट्यपरम्परायाः जीवद्रूपं प्रतीकं अस्ति। एषः नाट्यरूपः न केवलं नाट्यशास्त्रस्य सिद्धान्तानुसारं अभिनयं करोति, अपि तु केरलस्य सांस्कृतिकं वैभवं च प्रकटयति। अतः, कूटियाट्टं भारतीयनाट्यपरम्परायाः अमूल्यं रत्नं भवति।

केरलकलामण्डलं, अम्मन्नूर् गुरुकुलम्, मार्गी इत्यादयः संस्थाः कूटियाट्टस्य शिक्षायै, संरक्षणाय च कार्यं कुर्वन्ति

प्रथमं कूडियाट्टं यत् केरलेभ्यः बहिः प्रस्तूयते स्म तत् आसीत् – "तोरणयुद्धम्" इति नाम्ना(१९६२, चेन्नै नगरे)। रावणस्य पात्रं गुरुः माणि-माधव-चाक्यार् अवहत्। हनूमतः पात्रं माणि-नीलकण्ठ चाक्यार्। विभीषणः माणि-दामोदर-चाक्यार्। शङ्कुकर्णः पी. के. जी. नम्ब्यार्। चतुर्थ-षष्ठशताब्द्योः मध्ये संस्कृतनाटकस्य सुवर्णयुगः आसीत्। क्रिस्तोः पूर्वं द्वितीयशताब्दे भरतमुनिना रचितं नाट्यशास्त्रं

एवं ततः अनन्तरं भासः, कालिदासः इत्यादयः नाटककाराः संस्कृतनाटकानां समृद्धिं संवर्धितवन्तः। भरतमुनेः शिष्यौः कोहलः, दत्तिलः च तस्य परम्परां अनुवर्तितवन्तौ। किन्तु क्षेत्रीयभाषाणां कलारूपाणां च विकासेन एकदशशतके संस्कृतनाटकपरम्परा शनैः शनैः विलुप्ता अभवत्। किन्तु, केरलस्य संस्कृतनाट्यरङ्गः उत्तरभारते जातानां सामाजिक-राजनीतिकपरिवर्तनानां प्रभावं विना स्वस्वरूपे स्थिरः स्थितः। कूटियाट्टनाट्ये वाद्योपकरणानां विशेषं महत्त्वं अस्ति। वाद्यध्वनिभिः एव रसभावानां उत्कर्षः भवति। अतः एतानि वाद्योपकरणानि अस्य नाट्यस्य अभिवाद्यघटकाः भवन्ति।

## कूटियाट्टनाट्ये उपयुज्यमानानि वाद्योपकरणानि

कूटियाट्टं भारतस्य प्राचीनतमं संस्कृतनाट्यरूपम् अस्ति। अस्याः नाट्यशैली विशेषतः केरलप्रदेशे विकसितः अस्ति। अस्मिन् नाट्ये वाद्ययन्त्राणां महत्त्वपूर्णं स्थानं अस्ति। प्रमुखानि वाद्योप-करणानि एतानि सन्ति-

नाट्ये वाद्योपकरणानां महत्त्वपूर्ण स्थानं अस्ति

1. **मिज़वः** (Mizhavu) अयं वाद्ययन्त्रम् कूडियाट्टनाट्ये अतीव महत्वपूर्णं अस्ति। अस्य ध्वनिः गंभीरः भवति।

2. **इटक्का** (Edakka) इटक्का मधुरध्वनियुक्तं वाद्योपकरणं अस्ति। अयं वाद्यः विशेषतः भावाभिनयस्य समये प्रयोगं प्राप्नोति।

3. **शुद्धमद्दलम्** (Sudhamaddalam) अयं वाद्यं कोमलस्वरयुक्तं अस्ति। अस्य प्रयोगः विशेषतः नाट्यप्रस्तावे भवति।

4. **कोम्पु** (Kombu) कोंबु एकं तुर्यं अस्ति, यः कूटियाट्टनाट्ये वीररसस्य तथा उत्तेजनस्य अवसरं सूचयति।

**तालवाद्योपकरणानि** (Cymbals)

कूटियाट्टनाट्ये विविधानि तालवाद्योपकरणानि उपयुज्यन्ते, यथा एलेत्तालम् (Elathalam) इत्यादि। एते वाद्योपकरणानि तालसंरक्षणाय प्रयुज्यन्ते।

## Summarised Overview

केरलमण्डले, यत्र सहृदयाणां हृदयेषु नाट्यरससरित्स्नानं सततमसकृद्भवति, तत्र पञ्च महाश्रेयसीः कलारूपाणि दिव्यरत्नमिव विराजन्ते। कथाकेलि - दीप्तवेषधरैः रङ्गयोद्धृभिः कथानकव्यूहः प्रत्यक्षीक्रियते। वीरश्रृङ्गारादिरससमृद्धं, चतुर्विधानभिनयसमर्पितं, भावरागतालादिसमायोगात् प्रभाववति। अष्टपदीयाट्टम् -जयदेवकवेरश्रुतपूर्वैः अष्टपदीगीतैः सिक्तं रसिकहृदयदर्पणमिव निर्मलत्वेन प्रेक्ष्यते। श्रृङ्गाररसपर्यवसानं, माधुर्यगति-भावलालित्ययुक्तं भक्तिनृत्यम्। मोहिनीयाट्टम् -नायिकारूपधारिण्या नर्तक्याः कोमलविलासो, लास्यरसाभिषिक्तं, सौम्यभावप्रधानं, हरिणशिशुगत्या सरसतया दर्शकमानसं मोदयति। चाक्यार्कूत्त् - एकनटविन्यस्तं व्यङ्ग्यकथासंप्रेषणम्, संस्कृतप्राकृत-मिश्रभाषाव्यवहारं, हास्यरसपरिपाकयुक्तं, सूक्ष्मचातुर्यं, लोकोपदेशपर्यालोचनायाम् उपयुक्तम्। कूटियाट्टम् - भारतीयनाट्यशास्त्रस्य जीवमानप्रतिनिधिः, नाट्यपारम्पर्यातिक्रमसम्भूतं, सूत्रधाराद्य-नुष्ठानयुक्तं, गूढाभिनयसंपन्नं, साङ्गोपाङ्गं च नाट्यकला-रत्नम्। एतेषां पञ्चानां नाट्यानां संमेलनं, केरलसंस्कृतेः रसशास्त्रीयब्रह्माण्डमिव, शब्दार्थतालभावसङ्गतिं प्रतिपादयति।

## Assignments

**I. वाक्येन वाक्यद्वयेन वा उत्तरत।**

1. कथाकेल्याः मुख्यलक्षणं किम् ?
2. कथाकेलीनाट्यस्य विशेषताः काः ?
3. हिंस्रप्रकृतिपात्राणां विशेषः वेषः कः ?

4. कूत्त् नाम नाट्यस्य प्रमुखलक्षणं किम् ?
5. कूटियाट्टं भारतीयनाट्यपरम्परायाः अमूल्यं रत्नं भवति। विशदयत।

## II. टिप्पणीं लिखत।

1. कथाकेलिनाट्ये विभिन्नपात्राणां स्वभावं, गुणधर्मं च दर्शयितुं विभिन्नाः वेषाः प्रयुक्ताः भवन्ति। स्पष्टयत।
2. "कथाकेलि – भक्तिवीररसयोरैक्यमयः दृश्यकाव्यः" विशदयत।
3. वाद्योपकरणानि नाट्यस्य रसनिर्माणे, भाववृद्धौ, तथा वातावरणस्य निर्माणे च सहायकानि भवन्ति। विशदयत।
4. अष्टपदीयाट्टस्य च मोहिनीयाट्टस्य च तुलनात्मकविचारः क्रियताम्।
5. "मोहिनीयाट्टे भावाभिनययोः प्रयोगः"
6. "कूटियाट्टे नाट्यशास्त्रस्य प्रभावः"

## III. निबन्धात्मकः प्रश्नाः।

1. कथाकेलीनाट्यरूपस्य संरक्षणं, संवर्धनं च न केवलं कलाकाराणां कर्तव्यं, अपि तु सम्पूर्ण-भारतीयसंस्कृतेः परिरक्षणाय आवश्यकम्- विशदयत।
2. "केरलनाट्यकलानां साङ्गोपाङ्गविवेचनम्" विशदयत।
3. "चाक्यार्कूत्त् - हास्येन संस्कृतिचिन्तनस्य माध्यमम्" विशदयत।
4. "केरलनाट्यरूपेषु संगीतवाद्यानां च योगदानम्" विशदयत।
5. "केरलनाट्यकलेषु आहार्यविन्यासस्य वैशिष्ट्यम्" विशदयत।

# Suggested Readings


1. Dr. M.V. VishnuNamboothiri Natan kalakal natan paattukal(mal), Poorna Publications, Calicut.
2. Raghavan Payyanad, Kerala Folk Lore(mal), Folklore Fellows Of Malabar trust.
3. Prof. P.C. Vasudevan Ilayath Krishnanattam, translation(mal), Guruvayur Devaswom Publications.
4. Krishnakumar, Krishnanattam(mal), Kerala Bhasha Institute,

Thiruvanathapuram

5. Dr. J.Unnikrishnapillai, Kshetrakalasaahithyam arangum paathavum(mal), Kraisthava kalakshethrram, Pathanamthitta.
6. Aswathi Thirunnaal Gouri Lakshmibhayi, Keralasamskaaram oru thiranottam(mal), Mathrubhumi Books.

## References


1. Dr. Sasidharan clari, Keraleeya kalakal, classic kalakal oru Pathanam (mal), Olive Publications, Calicut.
2. Thiyyaadi Raman Nambyaar, Ayyappan theeyaattu(mal), Keralabhasha Institute, Thiruvanathapuram.
3. B. Ravikumar, Anushtaanakala Rangavatharanagalum Folklorum (mal), Keralabhasha Institute, Thiruvanathapuram.
4. Surendran cheekkilodu, Keralacharithravum Samskaaravum(mal), Mathrubhumi Books.
5. Dr. P. Soman Folklore Samskaaram, (mal), Kerala Bhasha Institute, Thiruvanathapuram
6. Dr. M.V.Vishnunamboothiri, Folklorum janasamskaaravum(mal), Kerala Bhasha Institute, Thiruvanathapuram.
7. V. Kaladharan, Malayalamudra drisya-sravya kalakal(mal), D.C. Books, Kottayam.


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# Krisnanattam- Krsnagiti

## कृष्णनाट्टम्-कृष्णगीतिः

## Learning Outcomes

- केरलस्य सांस्कृतिकपरम्परायाः गहनतया अवगाहनम्।
- केरले विद्यमानानां नृत्यरूपाणां अवगमनम्।
- नृत्यरूपाणां सामाजिकमहत्त्वं अवगच्छति।
- कृष्णनाट्टं भक्तिरसयुक्तं सांस्कृतिकपरम्परास्वरूपम् इत्यवगमनम्।

## Background

अद्यतनकालेऽपि केवलं गुरुवायूर्देवालये एव एषः कृष्णनाट्टरूपः प्रत्यक्षीकर्तुं शक्यते। अस्य इतिवृत्तम् (कथावस्तु) अष्टसु अङ्गेषु विभक्तम् अस्ति। अवतारात् आरभ्य स्वर्गारोहणपर्यन्तम्। श्रीकृष्णस्य लीलाचरित्रं यथाक्रमं नाट्यरूपेण अत्र प्रदर्श्यते। यतः एषः कृष्णस्य नृत्यनाट्यरूपः, तस्मात् 'कृष्णनाट्टम्' इति नाम समुचितम्। अष्टसु अङ्गेषु विभक्तत्वात् एतत् 'कृष्णाष्टकम्' इति अपि कथ्यते। केरलराज्ये प्रचलितानि कलारूपाणि द्विधा विभक्तानि दृश्यन्ते - शास्त्रीयकलाः च लोककलाः च। यद्यपि कृष्णनाट्टम् शास्त्रीयकलासु गण्यमानम्, तथापि तत्र लोककलायाः तत्वानि अपि अन्तर्भवन्ति। एषः लेखः कृष्णनाट्टस्य परम्परागतप्रदर्शनकलासु स्थानं, महत्त्वं च समीक्षते। एषः कलारूपः देवालयपरिसरे अनुष्ठीयते, भगवतः श्रीकृष्णं प्रति श्रद्धाभावेन समर्प्यते।

SGOU

## Keywords

कृष्णनाट्टम् - अष्टपदीयाट्टम् - भक्तिकला - अष्टधा विभागिता - सांस्कृतिकविरासत् - अष्टनाट्याः - वेषभूषा - अभिनयशैली - पूर्वानुष्ठानानि - पुरप्पाट्टु - धनसी - प्रदर्शनकला।

## Discussion



### कृष्णनाट्टम् - कृष्णगीतिः

एषः नृत्यनाट्यः भगवान् श्रीकृष्णस्य जीवनचरितं प्रतिपादयति

कृष्णनाट्टम् भारतीयसंस्कृतेः एकं भक्तिरसप्रधानं नाट्यरूपम् अस्ति, यः विशेषतः केरलप्रदेशे प्रसिद्धः। एषः नृत्यनाट्यः भगवान् श्रीकृष्णस्य जीवनचरितम् प्रतिपादयति। अस्य नृत्यशैली कथाकेली-शैलीतः निष्पन्ना, किन्तु विशिष्टः। कृष्णनाट्टस्य रचनाकारः केरलवर्म-महाराजः इति प्रसिद्धः।

अस्य नाट्यस्य मूलं भागवतपुराणे वर्तते। एषः नाट्यः विशेषतः गुरुवायूरमन्दिरे प्रस्तुतः भवति। कृष्णनाट्यस्य कथा तथा विषयः भगवतः कृष्णस्य बाल्यं, लीलाः, युद्धानि, तथा मोक्षप्रदानं च। एषः नाट्यः अष्टाङ्गेषु (अवस्थासु) विभक्तः भवति।

अस्य नाट्यकलारूपस्य प्रतिष्ठा "कृष्णगीति" इति काव्यसङ्ग्रहे अधिष्ठाय सम्पन्ना

कृष्णनाट्टम् इत्येतत् दृश्यकाव्यं कालिकट् नगरे शासनं कुर्वतः जामोतिरिराजस्य कृतितः आट्टकथायाः आधारं कृत्वा जातम्। अस्य नाट्यकलारूपस्य प्रतिष्ठा "कृष्णगीतिः" इति काव्यसङ्ग्रहे अधिष्ठाय सम्पन्ना। माणवेदः इति श्रीकृष्णभक्तपरायणः राजा एतद् नाट्यं भगवत्कृष्णस्य भक्तिपरं समर्पणम् इति मन्यते, यः तस्य प्रति श्रद्धाभावेन एतस्य नाम 'कृष्णनाट्टम्' इति अकरोत्।

## कृष्णनाट्टस्य इतिहासः

अष्टपदीयाट्टम् इत्याख्यः, प्रारभ्यते स्म

पूर्वभारते द्वादशशतके जातस्य कवेः जयदेवस्य भक्तिकाव्यम् गीतगोविन्दम्, केरलदेशे विशेषं यशः प्राप्तम्। अद्यापि तत् देवालयेषु सश्रद्धं गीयते स्मर्यते च। अस्य काव्यस्य प्रभावेण एकः कृष्णनाट्यरूपः, अष्टपदीयाट्टं इत्याख्यः, प्रारभ्यते स्म। किन्तु कालान्तरे तेन कृष्णनाट्टेन विख्यातः अभवत्। कृष्णनाट्टस्य कर्ता आसीत् माणवेदः नाम कविः, यः षोडशशताब्द्याः अन्ते जातः। कथ्यते यत् एकस्मिन् दिव्यदर्शने सः मुरलीवादनरतं श्रीकृष्णं दृष्टवान्। तस्मात् प्रेरितः सः "कृष्णगीतिः" इत्याख्यं भक्तिकाव्यं रचयामास।

## कृष्णनाट्टस्य नाट्यप्रकरणानि

कृष्णनाट्टम् इत्येतत् नाट्यरूपं भगवतः विष्णोः दशावतारेषु श्रीकृष्णावतारस्य पूर्णं जीवनचरित्रं नाट्यगायननृत्यरूपेण दर्शयति। एषः सम्पूर्णकथासमूहः भागवतपुराणे, विशेषतः दशमे चैकादशे स्कन्धे, तथा महाभारते हरिवंशे च आधारितः अस्ति। एतानि नाट्यानि संस्कृतभाषायामेव गीतरूपेण गीयन्ते।

कृष्णनाटट्टे कथा अष्टधा विभागिता अस्ति

कृष्णनाट्टस्य कथा अष्टधा विभागिता अस्ति। प्रतिदिनं एकस्य नाटकस्य अवतरणं भवति। एवं अष्टदिनेभ्यः अष्टनाट्यानि प्रस्तूयन्ते। प्रथमं "अवतारम्" इत्याख्यं नाटकं यत्र विष्णोः पृथिव्यां अवतरणं वर्ण्यते। अन्त्यदिने पुनरपि "अवतारम्" एव प्रस्तूयते, यथा अवतारस्य च पुनरावृत्तेः प्रतीकमिव भवति। भक्तियुक्तदृष्ट्या इदं मान्यते यत् - कृष्णनाट्टस्य दर्शनमात्रेण अपि पुण्यलाभः, आत्मशुद्धिः, च सिध्यति।

**कृष्णनाट्टस्य अष्ट नाट्यप्रकरणानि निम्नप्रकारेण सन्ति-**

1.अवतारम् - भगवान् विष्णोः श्रीकृष्णरूपेण भूमौ अवतरणम्।

2. कालियमर्दनम् - कालियनागस्य निग्रहे श्रीकृष्णस्य अद्भुतशौर्य-प्रदर्शनम्।

3.रासक्रीडा - गोपिकाभिः सह भगवतः रासनृत्यलीला, भक्तिविश्रान्तिः च।

4. कंसवधः - अत्याचारिणः कंसराजस्य हन्तारं कृष्णं तस्य धर्मविजयः च।

5. स्वयंवरम् - श्रीकृष्णस्य रुक्मिण्याः सह विवाहकथानकम्।

6. बाणयुद्धम् - बाणासुरेण सह श्रीकृष्णस्य युद्धं, अनन्तशक्तेः प्रकाशनम्।

7. विविदवधः - कपिराजः विविदः कृष्णेन हतः, असुरत्वविनाशस्य रूपम्।

8. स्वर्गारोहणम् - श्रीकृष्णस्य स्वधामप्रतिपत्तिः, दिव्यप्रस्थानम्।

एवं भगवतः श्रीकृष्णस्य जीवनचरित्रं, लीलाः च, श्रद्धया भक्त्या च सह अष्टदिनेभ्यः अष्टनाट्यानि अवतारितानि भवन्ति। एषां नाट्यानां रूपेण, गीतं, नृत्यं, अभिनयशैली च सम्यग्विलीनानि भवन्ति, येन रसिकः दर्शकः दिव्यानुभूतिं अनुभवति। अस्य काव्यस्य आधारेण सः स्वयं कृष्णनाट्टं इत्येतत् नाट्यरूपं ससर्ज। समुत्सृज्य जब्बरकोट्टैः शासितायाः सामेरिन् (Zamorin) वंशस्य ह्रासे, कृष्णनाट्टं सम्प्रदायः

केरलमध्यभागे गुरुवायूपुरीस्थिते देवालये स्थाप्यते स्म। तत्रैव अद्यापि कृष्णनाट्टसमूहः परम्परया अस्य नाट्यकलायः अनुष्ठानं करोति।

## कृष्णनाट्टे वेषभूषा, अभिनयशैली च

कृष्णनाट्टनाट्ये नर्तकानां वेशभूषायां प्रमुखः अङ्गः भवति विस्तीर्णं चञ्चलवस्त्रम्, यत् अधोभागे परिधानं क्रियते। एवं च स्वर्णच्छन्नानि काष्ठनिर्मितानि भूषणानि अपि वेशस्य महत्त्वपूर्णानि अङ्गानि सन्ति। वर्णमयं रुचिरं च मुखचित्रणम् अपि अस्य वेशशृङ्गारस्य अविभाज्यं भागम्। यद्यपि एते सर्वे सामान्यलक्षणानि सन्ति, तथापि कृष्णनाट्टे कूटियाट्टे च विशिष्टभेदाः अपि दृश्यन्ते। कृष्णनाट्टे अभिनेतारः स्वस्वकण्ठेन संवादान् न वदन्ति। द्वौ गायकौ एव संगीतेन सह नाट्यगीतानि गायतः। एते गायनं कुर्वन्ति केरलमन्दिरेषु गीतगोविन्दपाठाय प्रचलितेन सोपानगीतेन। कृष्णनाट्टस्य वैशिष्ट्यम् एतत् यत् अभिनयः गायनात् पृथक्कृतः अस्ति। एतस्मात् कारणात्, नर्तकाः केवलं अभिनयन्ति, नृत्ते च एकाग्रता योजयति। किन्तु कृष्णनाट्टे अभिनयः कूटियाट्टवत् सविशदः नास्ति। अस्य कारणं भवति यत् एषः नाट्यप्रकारः भक्तिनिष्ठायां देवपूजायां व्यापृतः। एकं प्रमुखं वैशिष्ट्यम् कृष्णनाट्टे-मुखावरणानि (मास्क्) अपि उपयुज्यन्ते। एतानि मुखावरणानि मानवमस्तकात् अपि विपुलानि भवन्ति।

कृष्णनाट्टस्य वैशिष्ट्यम्- अभिनयः गायनात् पृथक्कृतः अस्ति

नृत्यं कृष्णनाट्टे विशेषं स्थानं वहति, यतः नर्तकाः गीतान् न गायन्ति। श्रीकृष्णस्य जीवनचरित्रे अपि नृत्यस्य अत्यन्तं महत्वम् अस्ति। कृष्णनाट्टे अभिनयप्रधानं (नाट्याभिनयः) तथा अनिर्वचनीयं नाट्यम् (नृत्तम्) च दृश्यते। श्रीकृष्णः गोपिकाभिः सह नृत्यं करोति, यत् अत्र प्रदर्श्यते। कृष्णनाट्टे नृत्यशैली स्थानीयलोकनृत्यानां प्रभावं प्रतिफलयति। एषा शैली भावनात्मकतां, भक्तिनिष्ठतां च सम्यक् प्रकाशयति।

कृष्णनाट्टे नृत्यशैली स्थानीयलोकनृत्यानां प्रभावं प्रतिफलयति

### कृष्णनाट्टे पूर्वानुष्ठानानि

कृष्णनाट्टनाट्यस्य प्रारम्भे "केलिकोट्टु" इति प्रमुखं कार्यक्रमं सम्पद्यते। गुरुवायुपुरक्षेत्रस्य पूर्वदिक्कोणभागे दिवाकाले मद्दल (मत्तालं), चेकन्दि (घण्टा), इलतालं (झिञ्झा) च वाद्यैः सह केलिकोट्टुनामकं सूचनावादनं सम्पद्यते। अनेन रात्रौ सम्पाद्ये नाट्ये जनानाम् आवेदना क्रियते।

सन्ध्याकाले प्रसाधनगृहे (अलङ्कारमन्दिरे) दीपः प्रज्वाल्यते। तस्मात् दीपात् अन्यः दीपः प्रज्वाल्यते, यतः सर्वे (पुंसः एव) नटाः भूमौ उपविश्य मेखलां धारयन्ति, प्रसाधनं कुर्वन्ति च।

कलीविलक्कु (नाट्यदीपः) नामकं दीपम्

यदा गुरुवायुपुरदेवालये नित्यकर्माणि समाप्तानि भवन्ति, तदा मूलविग्रहमन्दिरं (संस्कृते - गर्भगृहं) अपि वन्द्यते। ततः कलीविलक्कु (नाट्यदीपः) नामकं दीपं गर्भगृहस्य उत्तरदिशि स्थिते नाट्यमञ्चे स्थाप्यते।

एषः दीपः प्रसाधनगृहदीपात् ब्राह्मणेन प्रज्वाल्यते। तत्रैव वाद्यानि - मत्तालं, चेकन्दि, इलतालं च दीपस्य पृष्ठे भूमौ स्थाप्यन्ते। वादकाः, तानि वाद्यानि आदरपूर्वकं स्पृष्ट्वा, पुनः तानि गृह्णन्ति, द्वाभ्यां पार्श्वाभ्यां स्वल्पं वाद्यं कृत्वा, शब्दब्रह्म आवाहयन्ति, च ततः परिधानाय ग्रीवायां स्थापयन्ति। एवं पुनः एकवारं केलिकोट्टुकार्यक्रमः सम्पद्यते। तदनन्तरं, चित्रवर्णयुक्तं चतुर्भुजं तिरश्शीलं (पटपरदा), द्वाभ्यां पार्श्वसहायकेभ्यां दीपस्य पृष्ठे तिष्ठतः।

एतस्मिन् काले, थोदयं नाम प्रार्थनानृत्यं सम्पद्यते। तस्मिन् स्त्रीपात्राणि दृश्यन्ते, तानि तिरश्शीलस्य पृष्ठे स्थित्वा, नृत्यं कुर्वन्ति।

"नारायण नरकान्तक नरकपरायण"

थोदयं, याज्ञिकं भक्तिपूर्णं च अङ्गं भवति। अत्र "नारायण नरकान्तक नरकपरायण" इत्यादिना आरभ्यमाणं पञ्चमं पदं कालियमर्दनं नाट्ये गीयते।

सर्वेषां नाट्यानां प्रारम्भे, "सौवर्णात्भूत" इत्यादिना आरभ्यमाणः मङ्गलश्लोकः पठ्यते शुभारम्भाय। थोदयस्य अनन्तरं, पुरप्पाट्टु नामकं केवलं नृत्यप्रधानं दृश्यं सम्पद्यते। अत्र कृष्णः, बलरामः वा उभौ अन्यैः पात्रैः सह, हस्ताङ्गसञ्चारेण, मुखविनोदेन, पदन्यासेन च नृत्यन्ति।

**अष्टसु नाट्येषु पुरप्पाट्टुनां विभागः -**

अवतारम् - ब्रह्मा भूमिदेवी च दृश्ये प्रथमं दृश्यं भवति तदेव पुरप्पाट्टुरूपेण स्वीक्रियते। अन्येषु नाट्येषु- यत्र कृष्णः बलरामः वा प्रथमं प्रविशति, तत् दृश्यं पुरप्पाट्टु भवति।

कंसवधम् - मध्यभागे पुरप्पाट्टु दृश्यते।

विविधवधम् - द्वे पुरप्पाट्टु दृश्येते, प्रथमं बलरामः तस्य पत्न्यः च, द्वितीयं कृष्णः भीमः अर्जुनः च।

स्वर्गारोहणम् - अस्मिन् नाट्ये पुरप्पाट्टु न दृश्यते।

**कृष्णनाट्टे निष्कर्षानुष्ठानानि**

यथापूर्वानुष्ठानानि, तथैव सर्वेषु नाटकेषु-स्वर्गारोहणं विना धनसी नामकं समापननृत्यम् अन्ते सम्पद्यते।

धनसी नामकं समापननृत्यम् अन्ते सम्पद्यते

एषा धनसी नामिका प्रक्रिया अन्त्यदृश्यमध्ये दृश्यपात्रैः विशेषनृत्यरूपेण सम्पाद्यते। अत्र "नारायण नरकान्तक नरकपरायण" इत्यादिना आरभ्यमाणं कालियमर्दन नाटकस्य पञ्चमं पदं गीयते।

नाटकपात्राणि क्रमशः रंगात् निष्क्रमन्ति। तस्मिन् काले शुभसमाप्तिं सूचयन् मङ्गलश्लोकः अपि पठ्यते।

नाटकसमाप्तौ, यथारम्भे मत्तालवादनम् आसीत्, तथैव समाप्त्युपलक्ष्यं किञ्चन तालवादनं मत्तालेन सम्पद्यते। एवं शुभसमाप्तिर्भवति।

समग्ररूपेण दृष्ट्वा कथयितुं शक्यते यत् केरलदेशे कालक्रमेण विकसितानि यान्यपि पारम्परिककलारूपाणि सन्ति, तेषां संमिश्रणेन कृष्णनाट्टं निर्मितमिति। कूटियाट्टम्, रामनाट्टम्, मोहिनीयाट्टम्, तुळ्ळल् च तादृशानि शास्त्रीयलोकनाट्यानि यद्यपि अस्मिन्कलारूपे प्रभावं उद्पादयन्ति। तथापि कृष्णनाट्टं ताभ्यः भिन्नम्, यतः अत्र भक्तिपरम्परायाः सूत्राणि प्रबलतया प्रवहन्ति।

कृष्णनाट्टस्य कथावस्तु भागवतम् आधारं कृत्वा रचितम्।

कृष्णनाट्टस्य कथावस्तु भागवतम् आधारं कृत्वा रचितम्। नाट्यशास्त्रविध्यनुसारं सुस्पष्टं सुसङ्गतं च रूपेण अस्य विकासः जातः। अधुनापि एषा कला गुरुवायूरप्रधानैः अन्यैः च देवालयैः बहुषु स्थलेषु प्रेक्षकेभ्यः समर्प्यते।

कथानकं नाट्यरूपेण दर्श्यते, यत् जनानां कृते सुलभतया ग्राह्यः भवति। तस्य कारणं यत् तत्र देशीयजनानां नृत्ये (नट्ट), तालयभङ्गे (ताल), अभिनयकौशल्ये (अभिनय), आहार्ये (आहार्य) च विषये विद्यमानः पारम्परिकानुभवः एव।

अस्य कृष्णनाट्टस्य अन्यत् विशिष्टं वैशिष्ट्यं यत्-एकः पात्रः गीतं गायति, अन्ये च तदनुसारं अभिनयं कुर्वन्ति, इति प्रकारेण शब्दस्य दृश्यस्य च सुन्दरसमन्वयः भवति।

कृष्णनाट्टं तादृशं पारमार्थिकं भावनायुक्तं नाट्यरूपम्, यत् मानवानां अन्तःकरणं स्पृशति, आत्मनः परे ब्रह्मणि संयोगं संवर्धयति।

अतो हि एषा परम्परागतनाट्यकला अद्यापि विजयसंपन्नतया प्रतिष्ठां प्राप्य, देशीयैः विदेशीयेः च पर्यटकैः सह विशिष्टरीत्या अवलोकयते।

## Summarised Overview

कृष्णनाट्टं केरलस्य एकं प्रसिद्धं भक्तिनाट्यरूपं अस्ति। श्रीकृष्णस्य जीवनकथां, विशेषतः भागवतम्, नाट्यरूपेण प्रस्तुतं कुर्वन् भक्तिरसस्य उद्घाटनं सम्प्रेषयति। एषा नाट्यकला कूटियाट्टं, रामनाट्टं, मोहिनीयाट्टं, तुळ्ळलादि अन्येषु पारम्परिककलानां प्रभावेण उत्पन्नं तथापि भक्तिपूर्वकं विशिष्टमस्ति।

कृष्णनाट्टे कथायाः प्रमुखं पात्रं श्रीकृष्णं केन्द्रीकृत्य, तत्संलग्नानि समस्तानि घटनानि, यथा कृष्णस्य बाल्यं, गोवर्धनगिरेः उड्डयनं, कंसवधं च, नृत्येण चित्रितानि। अत्र नाट्यशास्त्रस्य नियमाः, विशेषतः अभिनयम्, तालम्, नृत्यं, आहार्यं च ध्यानपूर्वकम् अनुसृत्य कथायाः निरूपणं कुर्वन्ति।

कृष्णनाट्टे एकं विशेषं लक्षणं अस्ति यत् एकः गायन् अन्ये अभिनयं कुर्वन्ति। अत्र ध्वनिसंयोजनस्य अन्यूना शैली दृश्यते। भक्तिरसस्य माधुर्यं सजीवतामानयति।

एषः नाट्यरूपः केरलस्य मन्दिरेषु विशेषतः गुरुवायुर् मन्दिरे प्रस्तूयते, यत्र दर्शकाः नृत्यस्य, संगीतस्य, आहार्यस्य च सामंजस्येण ईश्वरसेवनम् अभिमन्यन्ते। कृष्णनाट्टं एकं भक्तिपूरितं, सांस्कृतिकं, च काव्यात्मकं नाट्यरूपं अस्ति। तत् भक्तानां हृदयानि स्पृशति।

## Assignments

**I. एकेन वाक्येन वाक्यद्वयेन वा उत्तरत -**

1. कृष्णनाट्टस्य रचनाकारः कः?
2. "कृष्णगीति" इत्याख्यं भक्तिकाव्यं किम्?

3. कृष्णनाट्टस्य उद्भवमधिकृत्य विशदयत।

4. "कृष्णनाट्टे भक्तिरसस्य प्रवृद्धिः" - स्पष्टयत।

5. कृष्णनाट्टे वेषभूषा, अभिनयशैली च कीदृशी ?

6. कृष्णनाट्टं दर्शकानां मनोवृत्तिं कथं सन्तोषयति ?

**II. टिप्पणीं लिखत-**

1. कृष्णनाट्टे कूटियाट्टे च विशिष्टभेदाः अपि दृश्यन्ते- स्पष्टयत।
2. कृष्णनाट्टे नृत्यसंयोजनस्य विशेषताः काः?
3. कृष्णनाट्टस्य शास्त्रनिष्ठा एवं नाट्यशास्त्रसंबद्धता-
4. कृष्णनाट्टे संगीतसंगतिः-
5. कृष्णनाट्टे पात्रनिर्णयः-

**III. निबन्धात्मकः प्रश्नाः-**

1. "कृष्णनाट्टस्य प्रभावः" -विशदयत।
2. "कृष्णनाट्टे आहार्यरचनायाः महत्त्वं" -प्रतिपादयत।

## Suggested Readings


1. Dr M.V. VishnuNamboothiri Natan kalakal natan paattukal(mal), Poorna Publications, Calicut.
2. Raghavan Payyanad, Kerala FolkLore(mal), Folklore Fellows Of Malabar trust.
3. Prof. P.C. Vasudevan Ilayath Krishnanattam, translation(mal), Guruvayur Devaswom Publications.
4. Krishnakumar, Krishnanattam(mal), Kerala Bhasha Institute, Thiruvanathapuram.
5. Dr. J.Unnikrishnapillai, Kshetrakalasaahithyam arangum paathavum (mal), Kraisthava kalakshethrram, Pathanamthitta.
6. Aswathi Thirunnaal Gouri Lakshmibhayi, Keralasamskaaram oru

thiranottam(mal), Mathrubhumi Books.

## References


1. Dr Sasidharan clari, Keraleeya kalakal, classic kalakal oru Pathanam, (mal), Olive Publications, Calicut.
2. Thiyyaadi Raman Nambyaar, Ayyappan theeyaattu(mal), Keralabhasha Institute, Thiruvanathapuram.
3. B. Ravikumar, Anushtaanakala Rangavatharanagalum Folklorum, (mal), Keralabhasha Institute, Thiruvanathapuram.
4. Surendran cheekkilodu, Keralacharithravum Samskaaravum(mal), Mathrubhumi Books.
5. Dr. P. Soman Folklore Samskaaram(mal), Kerala Bhasha Institute, Thiruvanathapuram
6. Dr. M.V.Vishnunamboothiri, Folklorum janasamskaaravum, (mal), Kerala Bhasha Institute, Thiruvanathapuram.
7. V. Kaladharan, Malayalamudra drisya-sravya kalakal(mal), D.C. Books, Kottayam.


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

SGOU

# UNIT 4

# Eight Episode in Krisnanattam

## कृष्णनाट्टस्य अष्टौ संभवाः

## Learning Outcomes

- केरलस्य सांस्कृतिकपरम्परायाः गहनतया अवगाहनम्।
- केरले विद्यमानानां नृत्यरूपाणां शास्त्रीयावलेकनम्।
- कलारक्षणे सर्वकारस्य उद्योगसमूहानां च कर्तव्यनिष्ठायाः मूल्याङ्कनम्।
- कृष्णनाट्टं भक्तिरसयुक्तं सांस्कृतिकपरम्परास्वरूपम् इत्यवगमनम्।

## Background

कृष्णनाट्टम् नाम काचित् प्राचीना देवालयनृत्यकला अस्ति, या केवलं गुरुवायूर्पुरमन्दिरे 'गुरुवायूर् देवस्वं' समित्या आयोज्यते। अस्य कला-प्रदर्शनस्य आधारभूतः ग्रन्थः "कृष्णगीतिः" इत्याख्यं संस्कृतकाव्यं दृश्यते, यत् 1654 तमे वर्षे मानवेदन् नाम कालिकट्-राजेन विरचितम्। एषा नाट्यश्रृङ्खला अष्टसु नाटकेषु विभक्ता। अस्मिन् श्रीकृष्णस्य बाल्यकालात् स्वर्गारोहणपर्यन्तं जीवनचरितं चित्रितम्। तानि अवतारम्, कालियमर्दनम्, रासक्रीडा, कंसवधम्, स्वयंवरम्, बाणयुद्धम्, विविधवधम्, स्वर्गारोहणम् इत्याद्यङ्गानि सन्ति। अस्मिन् भागे कृष्णनाट्टस्य अष्टाङ्गानि अधिकृत्य पठामः।

SGOU

## Keywords

अष्टाङ्गात्मकः नाट्यक्रमः -अष्टसु दिनेषु -श्रीविष्णोः कृष्णरूपेण -कालियनागस्य दमनम् -कृष्णस्य रासलीला - मथुरायाः गमनम् -रुक्मिणीहरणम् - यदुवंशस्य अन्तः -अभिनयशैली -कृष्णाष्टमीदिने

## Discussion

### कृष्णनाट्टस्य अष्टाङ्गानि

प्रत्येकं नाट्याङ्गं श्रीकृष्णस्य जीवितचरित्रस्य विशेषांशं निरूपयति

कृष्णनाट्टम् एकः अष्टाङ्गात्मकः नाट्यक्रमः अस्ति। तस्य अङ्गानि अष्टसु दिनेषु क्रमशः प्रस्तूयन्ते। प्रत्येकं नाट्याङ्गं श्रीकृष्णस्य जीवितचरित्रस्य विशेषांशं निरूपयति। अष्टाङ्गानां नामानि निम्नप्रकारेण सन्ति-

1. अवतारम् - श्रीकृष्णस्य जन्मकथा।
2. कालियमर्दनम् - नागराजस्य दमनम्।
3. रसक्रीडा - गोपीजनसहितं रासलीला।
4. कंसवधः - अत्याचारिकंसस्य वधः।
5. कालयवनवधः - कृष्णेन कालयवनस्य विनाशः।
6. स्वयम्वरम् - रुक्मिणीसंग्रहणम्।
7. बाणयुद्धम् - उषा-अनिरुद्धकथा।
8. स्वर्गारोहणम् - कृष्णस्य मोक्षः।

**1. अवतारम्** (Avatāram)

श्रीविष्णोः कृष्णरूपेण अवतरणम्। वसुदेवदेवक्योः कथाः, नारदस्य शापः, कंसस्य भयं, कृष्णजन्म, गोकुलप्रवेशश्च दर्श्यते।

**2. कालियमर्दनम्** (Kāliyamardanam)

कालियनागस्य दमनम्। यमुनायां कृष्णस्य क्रीडनम्, नागस्य उन्मत्तत्वम्, तेन जनदुःखम्, तदनन्तरं श्रीकृष्णेन नागदलनं, कालियपत्नीभिः स्तुतिः च दृश्यते।

अष्टाङ्गानि अष्टसु दिनेषु क्रमशः प्रस्तूयन्ते

**3. रासक्रीडा** (Rāsakrīḍā)

गोपिकाभिः सह कृष्णस्य रासलीला। रात्रिक्रीडा, गोपिकानां वियोगवेदना, पुनः सान्निध्यं, रासमण्डलनिर्माणं, रासनृत्यं च अत्र प्रमुखम्।

**4. कंसवधः** (Kaṃsavadhaḥ)

कृष्णस्य मथुरायाः गमनम्, कंसेन आयोजिता मल्लयुद्ध प्रतियोगिता, कृष्णबलरामाभ्यां मुष्टिकचाणूरयोः वधः, ततः कंसवधः।

**5. स्वयंवरम्** (Svayaṃvaram)

रुक्मिणीहरणम्। रुक्मिण्याः पत्रं पठित्वा कृष्णेन सा हृता, रुक्मिणं पराजितवान्। विवाहनाट्यमपि अत्र दृश्यते।

**6. बाणयुद्धम्** (Bāṇayuddham)

बाणासुरस्य कुमारी उषा - अनिरुद्धस्य प्रेमकथा। बाणेन अनिरुद्धस्य बन्धनम्, ततः युद्धम्, बाणासुरविजयः च।

**7. विविधवधम्** (Vividavadham)

सुग्रीवभ्राता विविधः - एकः दैत्यः, यः द्रौपदीं लुण्ठयितुम् इच्छति। कृष्णस्य प्रसङ्गतः आगमनम्, विविधस्य वधः।

8. स्वर्गारोहणम् (Svargarohanaṃ)

द्वारकायां प्रलयः, यदुवंशस्य अन्तः, कृष्णस्य देहत्यागः, स्वर्गगमनं च। एवं लीला-संहारस्य समापनम् दृश्यते।

*स्मरणसूत्रम् (Mnemonic)> अ-का-रा-कं -स्व-बा-वि-स्व*

(अवतारम्, कालियमर्दनम्, रासक्रीडा, कंसवधः, स्वयंवरम्, बाणयुद्धम्, विविधवधः, स्वर्गारोहणम्)

कृष्णनाट्टस्य अभिनयशैली कथकलीशैली इव

अस्य कलारूपस्य अभिनयशैली कथकलीशैली इव भवति, किन्तु विलम्बितगतियुक्तं कोमलस्वरूपं च। मुद्राः, नेत्रचेष्टाः, हस्तसञ्चाराः नाट्याभिनये प्रमुखाः। नाट्ये शुद्धनृत्यं (Pure Dance) तथा अभिनययुक्तं गीतनाट्यं च मिलित्वा दृश्यते। वेशभूषा तथा अलङ्कारः- पात्रानुसारं अलंकरणं च दृश्यते-श्रीकृष्णः- पीताम्बरं, मुकुटं, मयूरपिच्छं च धरति। राधा गोपिकाः च सुकुमारपरिधानानि धरन्ति। असुराः - उग्रमुखसज्जाः, विशेषवेषयुक्ताःच भवन्ति। मुखसज्जा - कथकलीनाट्ये यथा तथा भवति। संगीतं तथा वाद्ययन्त्राणि च उपयुज्यन्ते। -अस्य संगीतं कर्णाटकीयशैलीयुक्तम् अस्ति। प्रयोगे मृदङ्गः, इटक्का, शङ्खः, मद्दलं, तालं, वंशी इत्यादीनि वाद्योपकरणानि प्रयुज्यन्ते। विशेषतः गुरुवायूर्मन्दिरे कृष्णाष्टमीदिने प्रचलितम्। मन्दिरेषु, उत्सवेभ्यः, सांस्कृतिकमञ्चेषु च अस्य सान्निध्यं वर्तते। कृष्णनाट्यं केवलं नृत्यनाट्यं न, अपि तु भक्तिरसयुक्तं सांस्कृतिक-परम्परास्वरूपम् अस्ति। अत्र नाट्यं, संगीतं, भक्तिः, कला, तथा

अस्य संगीतं कर्णाटकीयशैलीयुक्तम् अस्ति

नृत्यशैली च मिलित्वा, श्रीकृष्णलीलायाः जीवनस्वरूपं निर्मीयते। अतः अस्य नाट्यस्य स्थानं भारतीयसंस्कृतेः हृदये अतीव महत्वपूर्णं अस्ति।

## Summarised Overview

कृष्णनाट्टम् एकः अष्टाङ्गात्मकः नाट्यक्रमः अस्ति। प्रत्येकं नाट्याङ्गं श्रीकृष्णस्य जीवितचरित्रस्य विशेषांशं निरूपयति। सर्वाणि नाटकानि गीत-नृत्य-नाट्यसंयोगेन देवालये निशायां निष्पाद्यन्ते। प्रारम्भे केलिकोट्टु इत्याख्यं घोषणावादनं, ततः कालिविलक्कु दीपप्रज्वालनं च दृश्यते। सम्पूर्णं अभिनयं पारम्परिकवेशभूषणैः, शृङ्गारयुक्तैः पटाभरणैः, तथा गम्भीरसंगीत-वाद्यसहितं च भवति। कृष्णनाट्टं न केवलं एकं नाट्यं, किन्तु धार्मिकभक्त्या युक्तं कलात्मकं अर्चनारूपं संस्कारात्मकं च सम्प्रदायमण्डितं सम्पूर्णं सांस्कृतिक-परम्परानुकूलं अभिनयं अस्ति।

## Assignments

**I. एकेन वाक्येन वाक्यद्वयेन वा उत्तरत -**

1. कृष्णनाट्टं कतिविधैः नाटकैः आयोज्यते?
2. कालियमर्दने नाट्यङ्गे किं किं दृश्यते ?
3. कृष्णनाट्टे अभिनयशैल्याः विशेषता काः?

**II. टिप्पणीं लिखत-**

1. कृष्णनाट्टे वेशभूषाः तथा अलङ्कारः -
2. कृष्णनाट्टकलारूपस्य अभिनयशैली कथकलीशैली इव- स्पष्टयत।

**III. निबन्धात्मकः प्रश्नः -**

1. कृष्णनाट्टस्य तन्नाट्यङ्गानां नामानि क्रमशः लिखत। प्रतिनाटकस्य संक्षिप्तं कथावस्तु विशदयत।

2. कृष्णनाट्टं धार्मिकभक्त्या युक्तं कलात्मकं अर्चनारूपं संस्कारात्मकं सम्प्रदायमण्डितं सम्पूर्णं सांस्कृतिक-परम्परानुकूलं अभिनयं अस्ति- समन्वयत।

## Suggested Readings


1. Dr. M.V. VishnuNamboothiri Natan kalakal natan paattukal(mal), Porna Publications, Calicut,
2. Raghavan Payyanad, Kerala Folk Lore(mal), Folklore Fellows Of Malabar trust.
3. Prof. P.C. Vasudevan Ilayath Krishnanattam, translation(mal), Guruvayur Devaswom Publications.
4. S.Krishnakumar, Krishnanattam, (mal), Kerala Bhasha Institute, Thiruvanathapuram
5. Dr, J.Unnikrishnapillai, Kshetrakalasaahithyam arangum paathavum(mal), Kraisthava kalakshethrram, Pathanamthitta.
6. Aswathi Thirunnaal Gouri Lakshmibhayi, Keralasamskaaram oru thiranottam(mal), Mathrubhumi Books.


## References


1. Dr. Sasidharan clari , Keraleeya kalakal, classic kalakal oru Pathanam(mal), olive Publications, Calicut
2. Thiyyaadi Raman Nambyaar, Ayyappan theeyaattu(mal), Keralabhasha Institute, Thiruvanathapuram
3. B. Ravikumar, Anushtaanakala Rangavatharanagalum Folklorum(mal), Keralabhasha Institute, Thiruvanathapuram.
4. Surendran cheekkilodu, Keralacharithravum Samskaaravum(mal), Mathrubhumi Books.

5. Dr. P. Soman Folklore Samskaaram(mal), Kerala Bhasha Institute, Thiruvanathapuram
6. Dr. M.V. Vishnunamboothiri, Folklorum janasamskaaravum (mal), Kerala Bhasha Institute, Thiruvanathapuram.
7. V. Kaladharan, Malayalamudra drisya-sravya kalakal(mal), D.C. Books, Kottayam

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**SKILL ENHANCEMENT COURSE - 1 - M23SN01SE - THEATRE STUDIES**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
**(प्रथमो भागः)**

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a Paragraph)**

1. धनञ्जयस्य मतानुसारं किं नाम नाट्यम्?
2. नाट्यस्य मूलं कुत्र द्रष्टुं शक्यते ?
3. अभिनस्य प्रकाराः कति ? ते के?
4. संगीतरत्नाकरं अधिकृत्य लघुटिप्पणीं लिखत।
5. भारतीयसंस्कृतेः मूलभूततत्त्वानि कानि ?
6. कथकलीनाट्यस्य विशेषताः काः ?
7. कृष्णनाट्टे वेषभूषा, अभिनयशैली च कीदृशी ?
8. कालियमर्दने नाट्यङ्गे किं किं दृश्यते ?

## SECTION - B
**(द्वितीयो भागः)**

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions in a page)**

9. दृश्यकाव्यस्य प्राचीनतां प्रमाणैः सहितं दर्शयत।

10. प्राचीनभारतीयनाट्यस्य उत्पत्तिं विवृणुत।

11. नाट्यशास्त्रस्य प्रमुखाः विषयाः के? विशदयत ।

12. हस्तलक्षणदीपिकाम् अधिकृत्य टिप्पणीं लिखत।

13. प्रद्युम्नाभ्युदयस्य कर्तारं अधिकृत्य टिप्पणीं लिखत।

14. संगीतं न केवलं कर्णसुखं, अपि तु आध्यात्मिकानन्दस्य साधनं इत्युक्तेः विवेचनं कुरुत।

15. "कथाकेलि – भक्तिवीररसयोरैक्यमयः दृश्यकाव्यः" विशदयत।

16. वाद्ययन्त्राणि नाट्यस्य रसनिर्माणे, भाववृद्धौ, तथा वातावरणस्य निर्माणे च सहायकानि भवन्ति। विशदयत।

17. कृष्णनाट्टे कूटियाट्टे च विशिष्टभेदाः अपि दृश्यन्ते- स्पष्टयत।

18. "मोहिनीयाट्टे भावाभिनययोः प्रयोगः"-समर्थयत।

## SECTION – C

**(तृतीयो भागः)**

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. संस्कृतनाट्यसाहित्यस्य विकासक्रमः प्रमाणैः सहितं प्रदर्शयत।

20. नाट्यशास्त्रे दृश्यकाव्यस्य स्वरूपं कथं निरूपितम् भवति इति विशदयत।

21. आधुनिके समाजे आचार-संगीत-नृत्यानां त्रयाणां स्थानं किम्? उदाहरणैः सह विचारयत।

22. कथकेलीनाट्यरूपस्य संरक्षणं, संवर्धनं च न केवलं कलाकाराणां कर्तव्यं, अपि तु सम्पूर्ण-भारतीयसंस्कृतेः परिरक्षणाय आवश्यकम् - विशदयत।

SGOU

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No...................** **QP CODE ........................**

**Name.......................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**SKILL ENHANCEMENT COURSE - 1 - M23SN01SE - THEATRE STUDIES**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section - A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x2=10)**

**(Answer any five Questions in a paragraph)**

1. दशरूपकाणि कानि?
2. ऋग्वेदे प्रतिपादितानि संवादात्मकानि सूक्तानि कानि ?
3. नवरसाः के?
4. चाक्यार्कूत्त् नाम नाट्यप्रकारस्य विशेषता का?
5. संगीतस्य अवयवाः के ?
6. कूत्त् नाम नाट्यस्य प्रमुखलक्षणं किम् ?
7. "कृष्णनाट्टे भक्तिरसस्य प्रवृद्धिः" - स्पष्टयत।
8. कृष्णनाट्टं कतिविधैः नाटकैः आयोज्यते?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions in a page )**

9. संगीतरत्नाकरे प्रतिपाद्याः विषयाः के? विशदयत।

10. नाट्यशास्त्रं भारतीयसंस्कृतेः आत्मा इति कथ्यते-विशदयत।

11. नाट्यशास्त्रानुसारं नाट्यस्य उत्पत्तिं - विशदयत ?

12. काव्यस्य द्वे प्रमुखे प्रकारे दृश्यं श्रव्यं च स्तः - तयोः विशेषतां वर्णयत।

13. आश्चर्यचूडामणेः कर्ता शक्तिभद्रः - तमधिकृत्य विशदयत।

14. नृत्यं चेतसः शरीरस्य च समन्वयः – अस्य वाक्यस्य विस्तृतं लेखनं कुरुत।

15. अष्टपदीयाट्टस्य च मोहिनीयाट्टस्य च तुलनात्मकविचारः क्रियताम्।

16. "मोहिनीयाट्टे भावाभिनययोः प्रयोगः"-विशदयत।

17. "कृष्णनाट्टस्य शास्त्रनिष्ठा एवं नाट्यशास्त्रसंबद्धता"- समर्थयत।

18. कृष्णनाट्टकलारूपस्य अभिनयशैली कथकलीशैली इव- स्पष्टयत।

**SECTION - C**
**(तृतीयो भागः)**

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। (2x15=30)**

**(Write an essay on any two of the following)**

19. दशरूपकाणि कानि ? तेषां संक्षिप्तपरिचयं कुरुत।

20. नाट्यशास्त्रस्य प्रमुखविषयाः के? विशदयत।

21. "केरलनाट्यकलेषु आहार्यविन्यासस्य वैशिष्ट्यम्" विशदयत।

22. कृष्णनाट्टं धार्मिकभक्त्या युक्तं कलात्मकं अर्चनारूपं संस्कारात्मकं सम्प्रदायमण्डितं सम्पूर्णं सांस्कृतिक-परम्परानुकूलं अभिनयं अस्ति- समन्वयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

NO TO DRUGS

# തിരിച്ചിറങ്ങാൻ പ്രയാസമാണ്



SGOU

NO TO DRUGS

ആരോഗ്യ കുടുംബക്ഷേമ വകുപ്പ്, കേരള സർക്കാർ

# THEATRE STUDIES

COURSE CODE: M23SN01SE

SGOU

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-985210-5-7
9 788198 521057